

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्



Free

8

# संस्कृतसुधा

## अष्टमी कक्ष्या

(संयुक्तपाठ्यक्रमः)

8th Sanskrit Reader
(Composite Course)

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

TELANGANA

## విద్యార్థులకు సూచనలు

- ప్రతిపాఠంలో ముందుగా ఒక చిత్రం ఉంటుంది. ఆ చిత్రాన్ని చూడండి. దాని కింద ఉన్న ప్రశ్నలకు జవాబులను ఆలోచించి చెప్పండి.
- 'ఛాత్రేభ్యః సూచనాః' అనే గడిలోని సూచనలు చదవండి. వాటి ప్రకారం చేయండి.
- పాఠం చదవడానికి ముందు పాఠ్యాంశచిత్రాలను చూసి పాఠంలోని విషయాన్ని ఊహించండి. చిత్రాల ఆధారంగా సంభాషణలు చెప్పండి.
- ప్రతిరోజు పాఠాన్ని బిగ్గరగా చదవండి. మీ ఉపాధ్యాయుడు చదివేటప్పుడు జాగ్రత్తగా వినండి. మీకు తెలియని పదాలు/చదవలేకపోయిన పదాలను మీ ఉపాధ్యాయుడు ఎలా పలుకుతున్నాడో జాగ్రత్తగా వినండి. మీరు కూడా అలా చదవడానికి ప్రయత్నించండి.
- మీ ఉపాధ్యాయుడు పాఠం చెప్పేటప్పుడు జాగ్రత్తగా వినండి, మీకు తెలియని పదాల గురించి, విషయం గురించి తప్పకుండా అడిగి తెలుసుకోండి.
- పాఠం తర్వాత ఇచ్చిన 'ఏతాని కుర్వంతు' లోని అభ్యాసాలను మీ ఉపాధ్యాయుని అడిగి తెలుసుకోండి. ఆ తర్వాత మీరే సొంతంగా రాయాలి.
- అభ్యాసాలలో ఇచ్చిన ప్రశ్నలకు జవాబులను గైడ్లలో గాని, ఇతరుల నోటుపుస్తకాలలో గాని చూసి రాయకూడదు. ఎందుకంటే దాని వల్ల మీకు సొంతంగా రాయడం రాకుండా పోతుంది.
- అభ్యాసాలలో ఇచ్చిన వ్యాకరణాంశాలు మీకు అర్థంకావడానికి మొదట ఉదాహరణలు ఇచ్చారు. వాటిని ఆధారంగా అర్థం చేసుకొని రాయండి.
- స్వీయరచనా, సర్జనాత్మకవ్యక్తీకరణమ్, పరియోజనాకార్యమ్, ప్రశంసలకు సంబంధించిన అభ్యాసాల గురించి ముందుగా ఉపాధ్యాయుడు చర్చ నిర్వహిస్తాడు. మీరు ఆ చర్చలో పాల్గొనండి. తెలియని విషయాలను అడిగి తెలుసుకోండి.తర్వాత మీరే స్వంతంగా అభ్యాసాలను రాయండి. అవసరమైతే మీ తోటివారితో కలిసి చేయండి.
- మీరు రాసిన జవాబులను తరగతిగదిలో చదివి వినిపించండి. చేసిన ప్రాజెక్టుపనులను ప్రదర్శించండి. మీ ఉపాధ్యాయుడు ఇచ్చిన సూచనల ప్రకారం సరిచేసుకోండి. సరిచేసుకున్న తర్వాతనే నోటు పుస్తకాలలో రాయండి.
- పాఠంలో చివర 'స్వీయమూల్యాంకనమ్' అనే పట్టిక ఉంది. ఈ పట్టికలోని ఒక్కొక్క వాక్యాన్ని చదవండి. చేయగల్గితే **ఔనని**, చేయలేకపోతే **కాదని** గుర్తించండి. మీరు చేయలేని వాటి గురించి మీ ఉపాధ్యాయుని అడిగి మళ్ళీ అభ్యాసం చేయండి.
- పుస్తకంలో 'పఠంతు-నందంతు' పేరుతో మీకోసం కథలు ఇచ్చారు. వీటిని మీరే సొంతంగా చదవండి, ఆనందించండి.
- పుస్తకంలో "ఛాత్రైః సాధితవ్యాని సామర్థ్యాని" ఉన్న పేజిని చదవండి. దీనిలో ఉన్న సామర్థ్యాలనన్నింటినీ మీరు ఈ తరగతి పూర్తి అయ్యేసరికి చేయగలగాలి.
- పాఠశాలలో మీ స్నేహితులతో, ఉపాధ్యాయులతో సంస్కృతంలోనే మాట్లాడడానికి ప్రయత్నించండి.

## मम विषये

मम नाम : ..........................................

मम जनन्याः नाम : ..........................................

मम जनकस्य नाम : ..........................................

मम कुटुम्बजनाः : ..........................................

मम पाठशालायाः नाम : ..........................................

मम कक्ष्या : ..........................................

मम ग्रामस्य/नगरस्य नाम : ..........................................

पठितानां कथापुस्तकानां नामानि : ..........................................

..........................................

..........................................

..........................................

मम इष्टकथा : ..........................................

मम स्नेहितानां नामानि : ..........................................

..........................................

अहं सम्यक् पठित्वा .......................................... भविष्यामि।

SCERT TELANGANA

# संस्कृतसुधा

## अष्टमी कक्ष्या

### संयुक्त पाठ्यक्रमः

8th Sanskrit Reader
(Composite Course)

### सम्पादकमण्डली


**आचार्य विरिवेण्टि मुरलीधरशर्मा**
शिक्षाविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

**डा.दोर्बल प्रभाकरशर्मा**
विश्रान्तप्राचार्यः,
श्री वाड्रेवु जोगम्म वेदसंस्कृतकलाशाला,
कोव्वूरु, पश्चिमगोदावरी जिल्ला

**विद्वान् तिगुल्ल श्रीहरिशर्मा**
विश्रान्तप्राचार्यः
श्रीराजराजेश्वरसंस्कृतकलाशाला
वेमुलवाडा, करीनगरजिल्ला


### विषयनिपुणौ


**आचार्य रमाकान्त अग्निहोत्री**
विश्रान्तप्राचार्यः, दिल्लीविश्वविद्यालयः
नवदेहली

**श्री सुवर्ण विनायकः,**
संयोजकः, राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्


### संयोजिका


**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी,**
उपन्यासिका, राज्यविद्यापरिशोधनशिक्षणसंस्था, हैदराबाद्.


### पाठ्यपुस्तकविकासमुद्रापकसमितिः


**प्रधाननिर्वहणाधिकारी**
**ए. सत्यनारायण रेड्डि,**
सञ्चालकः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**निर्वाहकः**
**डा।। नन्नूररु उपेन्द्र् रेड्डि**
आचार्यः,
विद्याप्रणालिकापाठ्यपुस्तकविभागः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**प्रधानव्यवहारनिर्वाहकः**
**श्री बि.सुधाकरः**
सञ्चालकः,
प्रभुत्वपाठ्यपुस्तकमुद्रणालयः,
हैदराबाद्

## तेलंगाणप्रभुत्वप्रकाशनम्


*सत्यमेव जयते*
*विद्या ददाति विनयम्*

*धर्मो रक्षति रक्षितः*
*कृषितो नास्ति दुर्भिक्षम्*

SCERT TELANGANA

© Government of Telangana, Hyderabad

*First Published 2013*
*New Impressions 2014, 2015, 2016, 2017, 2018*

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copy right holder of this book is the Director of School Education, Hyderabad, Telangana.

This Book has been printed on 70 G.S.M. SS Maplitho
Title Page 200 G.S.M. White Art Card

**तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19**

*Printed in India*
at the Telangana Govt.Text Book Press,
Mint Compound, Hyderabad,
Telangana.

SCERT TELANGANA

# पुरोवाक्

भाषा विचाराणामुपयोगार्थं प्रभावि साधनम् । बालाः जन्मतः अनेकभाषाः ज्ञातुं समर्थाः भवन्ति इति भाषाशास्त्रज्ञाः न्यरूपयन् । बालाः पाठशालायाः प्रवेशात् पूर्वमेव ते स्वपरिसरेषु केवलश्रवणेन विविधभाषाः अधिगच्छन्तीति विषयः अस्माकम् अनुभवे अस्त्येव । विविधभाषाभ्यासेन बालानां ज्ञानं विस्तृतं भवति । बहुभाषावेत्तृषु बालेषु प्रज्ञा विशिष्टा भवति इति बहुभिः परिशोधनैः निरूपितम् ।

अस्माकं देशे त्रिभाषासूत्रं प्रयोगे अस्तीति कारणतः पाठशालाशिक्षायां बालाः प्रथमभाषारूपेण मातृभाषाम्, द्वितीयभाषात्वेन प्रान्तीयभाषाम् अथवा हिन्दीभाषां, तृतीयभाषात्वेन आङ्ग्लभाषां च अभ्यस्यन्ति । त्रिभाषासूत्रानुसारं संस्कृतम् अस्माकं राज्ये ऐच्छिकभाषारूपेण अधीयते । अत्र संयुक्तपाठ्यक्रमे अंशतया प्रथमभाषया तेलुगुभाषया सह संस्कृतं बोध्यमानमस्ति । संयुक्तपाठ्यक्रमे विंशत्यङ्कानां कृते संस्कृतं परिकल्पितम् । राष्ट्रियविद्याप्रणालिकापत्रम् २००५ संस्कृतम् आधुनिकभाषात्वेन अधिगन्तुं शक्यते इति सूचयति ।

अनादिकालतः संस्कृतस्य भारतीयभाषाभिः अविनाभावसम्बन्धः अस्ति । अतः इतरभाषाः इव भारतस्य बहुभाषिकत्वे संस्कृतम् अविभाज्यम्, अनिवार्यञ्च । संस्कृतभाषाध्ययनेन इतरभाषापदानां परिचयः भवति । तेन भाषान्तरेषु विद्यमानानां शास्त्रसाङ्केतिकपारिभाषिकपदानां निर्दुष्टोच्चारणम्, अवगमनं सुकरं भवति । नैतिक-सामाजिकमूल्यानि, धार्मिकदृष्टिः, ऋजुवर्तनम् इत्यादयः गुणाः संस्कृताध्ययनेन जायन्ते ।

प्राचीनकालतः अद्यावधि तेलुगुभाषायां संस्कृतपदानि असङ्ख्याकानि व्यवहारे सन्ति । संस्कृताध्ययनं ये कुर्वन्ति ते तेलुगुभाषां समर्थतया उपयोक्तुं शक्नुवन्ति। तेलंगाणराज्यविद्याप्रणालिकापरिधिपत्रम् २०११ संस्कृताध्ययनस्य आवश्यकतां प्रस्तौति ।

संस्कृतभाषाबोधने अध्यापकानां दायित्वं बहु वर्तते। तैः अनिवार्यतया संस्कृतेनैव सम्भाषणं करणीयम् । अभ्यसने सर्वेषां छात्राणां भागग्रहणं स्यात्। यथासाध्यं संस्कृतपदानि, तेलुगुभाषागततत्समपदैः तोलयन्तः, छात्रैः तानि वाचयन्तः, संस्कृतभाषावातावरणस्य निर्माणे अध्यापकाः पर्याप्तमवसरं कल्पयेयुः । तदर्थं सरलमौखिकसम्भाषणानि, गीतानि जून्, जुलै मासयोः अभ्यासनीयानि।

एतस्य पाठ्यपुस्तकस्य रूपकल्पने भागभाजाम् , उपाध्यायानाम्, उपन्यासकानां, विषयनिपुणानां, चित्रकाराणां, कार्यसंयोजकानाम्, उट्टङ्ककानां, चित्रसंयोजकानां, पाठ्यपुस्तकरूपकल्पने सहकृतवतां देहलीविश्वविद्यालयीयप्राचार्याणां रमाकान्त-अग्निहोत्रिमहोदयानाम्, सम्पादकमण्डलिसभ्यानाम्, सर्वेषां कृते विशेषकृतज्ञताः ।

एतस्मिन् पाठ्यपुस्तके पाठ्यांशतया स्वप्रकाशनेभ्यः बहूनंशान् सङ्गृहीतुम् अनुमतिं दत्तवत्यै **संस्कृतभारत्यै** विशेषधन्यवादाः । पाठ्यपुस्तकमिदं छात्राणां भाव्यभ्यसनाय आवश्यकानि सामर्थ्यानि, पाटवं च वर्धयतीति आशास्महे ।

सञ्चालकः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

SCERT TELANGANA

# अध्यापकेभ्यः सूचनाः

- पाठ्यपुस्तकस्य उपयोगात् पूर्वं पाठ्यपुस्तकेन अपेक्षितानि सामर्थ्यानि ज्ञातव्यानि । पुरोवाक्, विषयसूची इत्यादिकम् अवश्यं पठनीयम् ।
- पाठ्यपुस्तकं प्रथमभाषायाः तेलुगुभाषायाः अनुबन्धरूपेण उपयोक्तव्यम्।
- मातृभाषायाः बोधनार्थं सप्ताहे चतुरः कालांशान्, संस्कृतस्य पाठनाय कालांशद्वयं च उपयोक्तव्यम् ।
- एतस्य पाठ्यपुस्तकस्य बोधनार्थम् एकस्मिन् विद्यासंवत्सरे प्रायशः ७५ कालांशाः भवन्ति ।
- प्रत्येकमपि पाठस्य अष्टौ कालांशाः इति अंशं, तथैव ५६ कालांशान् दृष्टौ निधाय पाठ्यपुस्तकं निर्मितम् । तदनुगुणं कालांशविभजनं कृत्वा प्रणालिका रचनीया । बोधनाभ्यासप्रक्रियाश्च निर्वोढव्याः ।
- अष्टसु कालांशेषु पाठगतस्य विषयस्य बोधनाय त्रयः कालांशाः उपयोक्तव्याः । अवशिष्टकालांशान् उन्मुखीकरणाय, गणशः पाठनाय, अर्थावगमनाय, अभ्यासान् कारयितुं, व्यक्तिगतपाठनाय च उपयोक्तव्याः ।
- पाठबोधनस्य अपेक्षया अभ्यासान् कारयितुमेव अधिकाः कालांशाः उपयोक्तव्याः । एतदर्थम् आवश्यकतानुसारम् उपाध्यायः छात्राणां साहाय्यं कुर्यात् ।
- पुस्तके छात्रैः साधनीयानां सामर्थ्यानां पट्टिका अस्ति। अध्यापकाः छात्रैः तानि साधयेयुः ।
- सर्वस्य पाठस्य आरम्भे उन्मुखीकरणमित्यंशः अस्ति । तदधिकृत्य छात्रैः सम्भाषणं कारयितव्यम् । शिक्षकाः तदर्थं दत्तैः प्रश्नैः सह चिन्तयितुं योग्यान् अन्यानपि प्रश्नान् प्रष्टुं शक्नुवन्ति ।
- पाठ्यांशबोधनात् पूर्वमेव तत्रस्थान् श्लोकान् गीतानि च उपाध्यायाः आदर्शपूर्णतया वाचयेयुः । छात्राः च अनुवाचनं कुर्युः ।
- व्यक्तिशः प्रवाहपूर्णतया पाठं पठितुम् अभ्यासः कारयितव्यः ।
- छात्राः गणशः उपविश्य पाठ्यांशं सम्भाषणरूपेण यथा वदेयुः तथा अध्यापकैः व्यवस्था करणीया ।
- व्याकरणम् अनुप्रयुक्ततया बोधनीयम्। तदनुसृत्य एव अभ्यासाः कारयितव्याः ।
- एकस्मिन् पाठे निर्दिष्टानि सामर्थ्यानि ८०% छात्राः साधयन्ति चेदेव पाठान्तरं बोधनीयम् । एतदर्थं मासे स्थितानां कालांशानां विभजनार्थं योजना करणीया ।
- छात्राणां व्यक्तिशः पठनं प्रथमं भवेत् । ततः आवश्यकतानुसारं गणशः कार्यं दातव्यम् । गणशः कार्याणां कक्ष्याप्रकोष्ठे प्रदर्शनानन्तरं तद्गतानां दोषाणां चर्चया निराकरणं कुर्युः ।

  **श्रुण्वन्तु,विचिन्त्य वदन्तु** - अत्रस्थानि कृत्यानि पूर्णतया कक्ष्याप्रकोष्ठे एव कारयितव्यानि ।

  **पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु** - कृत्यानि व्यक्तिशः अथवा गणशः कारयितव्यानि ।

  **पदजालाभिवृद्धिः** - गणशः कृत्यानि कारयितव्यानि । ततः व्यक्तिशः लेखनीयानि ।

  **व्याकरणम्** - व्याकरणांशानां बोधनसमये उदाहरणानि **कृष्णफलके लेखनीयानि।** ततः चर्चया विषयावगमनं कारयितव्यम् । ततः अभ्यासकृत्यानि कारयितव्यानि ।

  **स्वीयरचना, सर्जनात्मकव्यक्तीकरणम्, परियोजनाकार्यम्, प्रशंसा** इत्येतानि सामर्थ्यानि उद्दिश्य लेखनार्थं सम्पूर्णकक्ष्यायां सूचनाः देयाः । तदनन्तरं छात्रैः एतानि सामर्थ्यानि कारयितव्यानि।
- छात्रैः लिखितेषु विषयेषु दोषाणां निवारणार्थं कक्ष्याप्रकोष्ठे चर्चा आयोजनीया । चर्चासमये क्रमशः भावः, वाक्यनिर्माणम्, पदानामौचित्यम्, अक्षरदोषाः च चिन्तनीयाः । आत्मना कृतान् दोषान् छात्राः स्वयमेव जानीयुः ।

  **स्वीयमूल्याङ्कनम्** - तत्रत्यान् अंशान् आधारीकृत्य स्वयं छात्राः मूल्याङ्कनं कुर्युः। तदर्थं ते अध्यापकैः प्रोत्साहनीयाः।

✦ पाठ्यांशबोधनसमये अधः दत्तानि सोपानानि अनुसरणीयानि ।

I. **उपोद्घातः** - स्वागतभाषणम्, उन्मुखीकरणम्, शीर्षिकाप्रकटनम्, नेपथ्यम् ।

II. **पाठ्यांशबोधनेषु / सामर्थ्येषु अवगमनम्** - चित्राण्युद्दिश्य भाषणम्, अध्यापकस्य आदर्शपठनम्, छात्राणां बाह्यपठनम्, छात्रैः अर्थसङ्ग्रहणम्, पाठितविषये चर्चा, अवगमनम्।

III. **अवगमनपरिशीलनम्** - पाठितविषयेषु छात्रावगमनपरिशीलनम् ।

IV. **गृहकार्यम्** - (परियोजनाकार्य-प्रशंसा-बोधितविषयाणां सम्बद्धं गृहकार्यम्)

✦ प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम -

२. पाठं बोधयितुम् आवश्यककालांशाः -

३. साधितव्यानि सामर्थ्यानि -

४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहाः | सामग्री / संसाधनानि | छात्रेभ्यः दीयमानः अभ्यासः, गृहकार्यञ्च |
|---|---|---|---|---|
| | | | | |

५. पाठ्यबोधनार्थम् आवश्यकतातिरिक्तसमाचारसङ्ग्रहणम् (अध्यापककृत्यम्)।

६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

✦ एवम् 'एतानि कुर्वन्तु' इति शीर्षिकागतांशेषु एकैकं कतिभिः छात्रैः कृतमिति परिशीलयेत् । आवश्यकतानुसारं प्रत्याम्नायबोधनं निर्वोढव्यम् ।

✦ सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material) दृष्ट्वा प्रश्नानां समाधानानाम् अभ्यासानां च लेखनं न कारयेत् । यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्तेति वदेत्। स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।

✦ निरन्तरसमग्रमूल्याङ्कनविध्यनुसारं छात्रप्रगतिं प्रतिदिनं पञ्जीकुर्यात् । एतदर्थं प्रत्येकपञ्जीकरणपुस्तिका स्थापनीया।

✦ निरन्तरसमग्रमूल्याङ्कनविधानेन जूलै, आगस्ट्, नवम्बर्, फिब्रवरीमासेषु आयोज्यमाननिर्माणात्मक-मूल्याङ्कनेषु छात्राणां भागग्रहणपरिशीलनं, लिखितविषयाः, कृतपरियोजनाकार्याणि, लघुपरीक्षा चेति एतैः चतुर्भिः छात्रप्रगतिं निर्धार्य छात्रप्रगतिसूचकपुस्तिकासु पञ्जीकरणं कुर्यात्। एतदर्थं प्रत्येकछात्रप्रगतिपञ्जीकरणपुस्तिका समुपस्थापनीया ।

✦ सेप्टेम्बर्/अक्टोम्बर्, डिसेम्बर्/जनवरी, एप्रिल्मासेषु अयोज्यमानसङ्ग्रहणात्मकमूल्याङ्कनार्थम् अध्यापकैरेव स्वयं सामर्थ्याधारितप्रश्नपत्रं पठनम् (५ अङ्काः), स्वीयरचना (५ अङ्काः), सर्जनात्मकव्यक्तीकरणम् (५अङ्काः), पदजालाभिवृद्धिः, व्याकरणांशाः (५ अङ्काः) प्रकारेण निर्मातव्यम् ।

✦ अनुबन्धे शब्दाः, धातवः दत्ताः सन्ति । पाठ्यांशेषु कृत्यानाम् अभ्याससमये सन्दर्भानुसारम् अनुबन्धे दत्तानां शब्दानां धातूनां च अभ्यासः छात्रैः कारयितव्यः ।



SCERT TELANGANA

# वन्दे मातरम्

- बङ्किमचन्द्र छटर्जी

वन्दे मातरं, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं, वन्दे मातरम्

# पठत संस्कृतम्

- श्री मञ्जुनाथशर्मा

पठत संस्कृतं, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि || पठत ||

ज्ञानवैभवं वेदवाङ्मयम्
लसति भवभयापहारि यत्र मुनिभिरार्जितम्
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाणमुख्यकविभिः || पठत ||

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्
यद्विना जना नैव जानते
भारतीयसंस्कृतिं सनातनाभिदां वराम् || || पठत ||

जयतु संस्कृतं संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्
जयतु संस्कृतं, जयतु मनुकुलम्
जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम् || || पठत ||

SCERT TELANGANA

# राष्ट्रियगीतम्

**- रवीन्द्रनाथ् ठागूर्**

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्ग !
विन्ध्य हिमाचल यमुना गङ्गा
उच्चलजलधितरङ्ग !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

# प्रतिज्ञा

**- पैडिमर्रि वेंकट सुब्बाराव**

भारतदेशः मम मातृभूमिः । भारतीयास्सर्वे मम सहोदराः ।

अहं मम देशं प्रीणामि । सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम् । तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि। सर्वैः सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

SCERT TELANGANA

## पाठ्यपुस्तकरूपकर्तारः

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**डा.मरुधूरि नरसिंहाचार्यः**
सहाध्यापकः
नगरपालिकोन्नतपाठशाला
विजयवाडा, कृष्णा जिल्ला

**श्री कोम्पल्लि शिवकुमारः**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
पर्लपल्लि, करींनगर् जिल्ला

**श्री के.रङ्गराजु**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
रङ्गापुरम्, रङ्गारेड्डि जिल्ला

**श्री तुर्लपाटि शिवरामकृष्णः**
संस्कृताध्यापकः
दिल्ली पब्लिक् स्कूल्
नाचारम्, हैदराबाद्

**श्री तिरुनगरि लक्ष्मणस्वामी**
सहाध्यापकः
श्रीराजराजेश्वरसंस्कृतपाठशाला,
वेमुलवाडा, करींनगर् जिल्ला

**श्रीमती पि.माधवी**
अध्यापिका,
ब्रिलियण्ट् ग्रामर् उन्नतपाठशाला,
दिलशुखनगरम्, हैदराबाद्

**डा.नारायणं वेङ्कटराम्बाबु**
सहाध्यापकः,
जिल्लापरिषत् उन्नतपाठशाला,
नकरिकल्लु, गुंटूरु जिल्ला

**श्री एन.सुब्रह्मण्येश्वरशर्मा**
सहाध्यापकः
पि.वि.आर्. पुरपालकबालिकापाठशाला
ओङ्गोल्, प्रकाशं जिल्ला.

**श्री इक्कुर्ति. वेङ्कटेश्वर्लु**
उपन्यासकः
गेट् शिक्षकप्रशिक्षणकलाशाला
तिरुपतिः, चित्तूरु जिल्ला

**श्री भुवनगिरि वेङ्कट लक्ष्मीनारायणः**
परिशोधनाधिकारी
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, चित्तूरु जिल्ला.

**श्री सी.हेच.कृष्णसायि**
पि.जि.टि.
आन्ध्रप्रदेशावासीयगुरुकुलपाठशाला
तूप्रान् , मेदक् जिल्ला

## चित्रकाराः

**कूरेल्ल श्रीनिवास्,** प्रधानाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला, कुर्मेडु, नल्लगोण्ड जिल्ला
**के.बाबु,** प्रधानाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला वज्रेपल्लि, निजामाबाद् जिल्ला
**टी.वि. रामकृष्णः,** चित्रलेखनाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला, दुद्देड, मेदक् जिल्ला
**टि.वि. मोहन्राज्,** चित्रलेखनाध्यापकः, सङ्क्षेमगुरुकुलपाठशाला, वेलिगोण्ड, प्रकाशं जिल्ला
**वड्डेपल्लि वेङ्कटेश्वर्लु,** अध्यापकः, प्राथमिकपाठशाला, सोमवरं, नल्लगोण्ड जिल्ला
**ए.गौरय्या(गौतम्),** चित्रलेखकः,कुरुपां, विजयनगरम् जिल्ला
**बि.वि.आर्. चारि,** चित्रकारः, निर्मल्, आदिलाबाद् जिल्ला
**कस्तूरि प्रभाकर्,** चित्रलेखनाध्यापकः,जिल्लापरिषत् उन्नतपाठशाला, पिल्लमर्रि, नल्लगोण्डा जिल्ला
**के राघवाचारी,** चित्रलेखनाध्यापकः,जिल्लापरिषत् उन्नतपाठशाला, नकरिकल्, नल्लगोण्डा जिल्ला

## उट्टङ्ककः

**श्री तुर्लपाटि शिवरामकृष्णः,** संस्कृताध्यापकः, दिल्ली पब्लिक् स्कूल्, नाचारम्, हैदराबाद्

SCERT TELANGANA

# विषयसूची


| पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|
| प्रथमः भागः | | | |
| १. रक्षत वृक्षान् | गीतम् | जून्<br>जुलै | 1-10 |
| ❖ मशकराज्यम् | पठन्तु नन्दन्तु | | 11-12 |
| द्वितीयः भागः | | | |
| २. सर्वे भवन्तु सुखिनः | सम्भाषणम् | आगष्ट् | 13-22 |
| ३. मैत्री | सुभाषितश्लोकाः | सेप्टेम्बर्<br>अक्टोबर् | 23-31 |
| ❖ ज्ञानोदयः | पठन्तु नन्दन्तु | | 32 |
| तृतीयः भागः | | | |
| ४. बाल्यं खलु विद्यायै | दिनचर्या | नवम्बर् | 33-42 |
| ५. सन्देशः | स्फोरकपत्रम् | डिसेम्बर् | 43-51 |
| ❖ चटक ! चटक ! | पठन्तु नन्दन्तु | | 52 |
| चतुर्थः भागः | | | |
| ६. किं न्याय्यम् ? | कथा | जनवरि | 53-62 |
| ७. स्फूर्तिः | लेखः | फिब्रवरि | 63-73 |
| पुनश्चरणम् | | मार्च्, एप्रिल् | |

**अनुबन्धः**

| | |
|---|---|
| शब्दरूपाणि | 74-78 |
| धातुरूपाणि | 79-82 |
| पदकोशः | 83-85 |
| क्रियापदकोशः | 86 |


❖ इत्यनेन चिह्नेन चिह्निताः अंशाः मूल्याङ्कनाय न उपयोक्तव्याः ।

SCERT TELANGANA

# अनेन पाठ्यपुस्तकेन छात्रैः साधितव्यानि सामर्थ्यानि

**I. श्रुण्वन्तु, विचिन्त्य वदन्तु**

- ❖ गीतानि, श्लोकाः, सम्भाषणानि, कथाः इत्यादीन् विषयान् श्रुत्वा छात्राः अवगच्छेयुः। तेषां भावान् मातृभाषया वक्तुं शक्नुयुः।
- ❖ संस्कृतेन पृष्टान् प्रश्नान् छात्राः अवगच्छेयुः। तेषां योग्यानि समाधानानि संस्कृतेन वदेयुः। ज्ञातान् विषायान् अधिकृत्य संस्कृतेन वदेयुः।
- ❖ लघूनि संस्कृतभाषणानि कर्तुं शक्नुयुः।

**II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु**

- ❖ श्लोकाः, कथाः, गीतानि, सम्भाषणानि, आत्मकथाः, निबन्धाः, लेखाः इत्यादिसंस्कृतविषयान् अवगच्छेयुः धाराप्रवाहतया पठेयुश्च ।
- ❖ पाठितस्य विषयस्य आधारेण दत्तानां प्रश्नानां समाधानानि लिखेयुः। पठनावगमनस्थानि कृत्यानि दोषान् विना कुर्युः।
- ❖ अपरिचितानां कथानां पत्रिकाणां च पठनेन विषयानवगच्छेयुः।

**III. स्वीयरचना**

- ❖ ज्ञातान् दृष्टान् श्रुतान् च विषयान् उद्दिश्य स्वप्रतिस्पन्दनं संस्कृतेन लेखितुं शक्नुयुः।
- ❖ बहुसमाधानवतां प्रश्नानां संस्कृतेन उत्तराणि लिखेयुः।
- ❖ आत्मानं तत्तत्सन्दर्भे ऊहित्वा अहं तत्र किं कर्तुं शक्नुयामिति विचिन्त्य प्रत्येकमपि छात्रः संस्कृतेन स्वानुभवं लेखितुं शक्नुयात् ।

**IV. पदजालाभिवृद्धिः**

- ❖ पाठ्यमानेषु अथवा श्रूयमाणेषु विषयेषु स्थितानां नूतनपदानां सन्दर्भानुगुणम् अर्थं ग्रहीतुं शक्नुयुः।
- ❖ ज्ञातपदानामाधारेण स्वयं वाक्यानि लेखितुं शक्नुयुः।
- ❖ समानार्थकपदानि विरुद्धार्थकपदानि च ज्ञातुं शक्नुयुः।

**V. सर्जनात्मकव्यक्तीकरणम्**

- ❖ प्रक्रियापरिवर्तनं कर्तुं शक्नुयुः।
- ❖ कथाः, गीतानि, कविताः स्मरेयुः स्वयं रचयेयुः च।
- ❖ लेखानां लेखनसामर्थ्यं प्राप्नुयुः । चित्राणां लेखनं, तेषां वर्णनं च स्वयं कर्तुं शक्नुयुः।
- ❖ तेलुगुभाषांशानाम् अनुवादं संस्कृतेन कर्तुं शक्नुयुः।

**VI. प्रशंसा**

- ❖ कवीनां, रचयितृणां च रचनाविधानं प्रशंसितुं शक्नुयुः।
- ❖ स्फूर्तिप्रदं विषयमधिकृत्य लिङ्ग-धर्म-वर्गादिभेदान् विना प्रशंसां कुर्युः।
- ❖ अन्येषां संस्कृतिसम्प्रदायान् प्रशंसेयुः।

**VII. व्याकरणांशाः**

- ❖ भाषाभागान् व्याकरणांशान् च ज्ञातुं शक्नुयुः। विभक्तीः अवगच्छेयुः । तासां प्रामुख्यं च जानीयुः। विना दोषं तासां प्रयोगसामर्थ्यञ्च प्राप्नुयुः ।
- ❖ वाक्यभेदान् जानीयुः। स्वयं प्रयोक्तुं शक्नुयुः।
- ❖ लिङ्गभेदान् विना दोषं प्रयुञ्जीरन् ।
- ❖ कालानुसारं लकाराणां पुरुषाणां च प्रयोगे समर्थाः भवेयुः ।
- ❖ सन्धीनां संयोजने, विघटने, समासानां विग्रहवाक्यानां च प्रयोगे समर्थाः भवेयुः।

SCERT TELANGANA

प्रथमः भागः

# १. रक्षत वृक्षान्

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



प्रश्नाः

१. चित्रे के के सन्ति ? किं कुर्वन्ति ?

२. वृक्षकाः अस्माभिः कथं वर्धनीयाः ?

३. वृक्षाः अस्माकं कृते किं किं यच्छन्ति ?

उद्देश्यम् - छात्रेषु प्रकृतिपरिरक्षणस्य विषये जागरूकतायाः विकासः। प्रकृतेः उपयोगकौशलसम्पदानम् ।

**छात्रेभ्यः सूचनाः -**

१. गीतं पठन्तु। अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चा कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



रक्षत वृक्षानस्मान्
भवतां रक्षां कर्तुम् ।
गोसम्पत्तिं काननवृद्धिं
प्राप्तुं परिसरशुद्धिम् ॥ ॥ रक्षत वृक्षान् ॥

फलपुष्पाणां समर्पणेन
प्रकृतिमातरं पूजयामः ।
दारुदलैर्गृहनिर्माणेन
वसतिमभीतिं कल्पयामः ॥ ॥ रक्षत वृक्षान् ॥



भवता सृष्टं मालिन्यं
निधाय हृदयेऽशेषम् ।
निर्मलसर्गं रचयित्वा
विदधामो बहु सन्तोषम् ॥ ॥ रक्षत वृक्षान् ॥

जलमूलं परिपालयामः
वायुमण्डलं पालयामः ।
सदोपकारं वितरामो
न ह्यपकारं चिन्तयामः ॥ ॥ रक्षत वृक्षान् ॥

- गुण्डमि गणपय्यहोल्लः

భావాః :

- మిమ్మల్ని రక్షించేటందుకు కారకులమైన మమ్మల్ని మీరు రక్షించండి. గోసంపద పెరుగుటకు, అడవులు అభివృద్ధి చెందుటకు, పరిసరాలు పరిశుభ్రంగా ఉండుటకు అవసరమైన చెట్లమైన మమ్మల్ని రక్షించండి.
- మేము ఫలపుష్పాలను సమర్పించి ప్రకృతి మాతను పూజిస్తాం. కొయ్య దుంగలతో గృహనిర్మాణం చేసి వసతిని కల్పించి మీకు భయం లేకుండా చేస్తాం.
- మీరు చేసే కాలుష్యాన్నంతటినీ ఏ మాత్రం మిగలకుండా హృదయంలో దాచుకొనే మమ్మల్ని మీరు రక్షించండి. మేము కాలుష్యరహితమైన, నిర్మలమైన ప్రకృతిని తయారుచేసి సమాజానికి సంతోషాన్ని కల్పిస్తాం.
- నీటికి ఆధారమైన కొండలు, నదులు, సముద్రాలు, సరస్సులు, చెరువులు మొదలైన అన్నింటిని రక్షిస్తాం. వాతావరణంలో కాలుష్యం లేకుండా చేస్తాం. ఎల్లప్పుడూ ఉపకారమే చేస్తాం. అపకారాన్ని గూర్చి ఆలోచన కూడా చేయం.

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. एतत् गीतं के गायन्ति ? एतेन गीतेन भवन्तः किं ज्ञातवन्तः ?

२. एतत् गीतं सरागं, सभावं गायन्तु ।

३. ''अस्मान् रक्षत'' इति वृक्षाः किमर्थं वदन्ति ?

४. वृक्षाः मानवानां कृते कथमुपयुक्ताः भवन्ति ।

५. वृक्षैः आनन्दः जायते एतद्विषये भवताम् अभिप्रायं वदन्तु ।

६. अस्मान् परितः विविधवृक्षाः सन्ति खलु ! भवतां विद्यालयस्य परिसरे स्थितानां वृक्षाणां नामानि वदन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. ''काननवृद्धिम् - परिसरशुद्धिम्'' एतादृशानि प्रासयुक्तपदानि गीते अन्विष्य लिखन्तु ।

SCERT TELANGANA

२. **अधः दत्तानि वाक्यानि पठन्तु । तेषां समानार्थकवाक्यानि गीते अन्विष्य तेषाम् अधः रेखाङ्कनं कुर्वन्तु ।**

अ. వృక్షాలమైన మమ్మల్ని రక్షించండి.

आ. భయరహితమైన వసతిని కల్పిస్తున్నాం.

इ. మీకు చాలా సంతోషం కలిగిస్తున్నాం.

ई. ఎల్లప్పుడు ఉపకారం చేస్తున్నాం.

३. **अधः दत्तानि वाक्यानि समीकृत्य पुनः लिखन्तु ।**

अ. वृक्षकान् अस्मान् रक्षत ।

आ. फलैः समर्प्य प्रकृतिं पूजयामः ।

इ. उपशाखिभिः गृहनिर्माणेन वसतिं कल्पयामः ।

ई. अग्निमूलं परिपालयामः ।

४. **अधः दत्तानां प्रश्नानां समाधानानि पाठस्य आधारेण लिखन्तु ।**

अ. वृक्षाः प्रकृतिमातरं कथं पूजयन्ति ?

आ. जलस्य आधाराः के ?

इ. वृक्षाः कीदृशान् विचारान् न कुर्वन्ति ?

ई. वसतिनिर्माणे वृक्षाः कथमुपकुर्वन्ति ?

५. **गीतस्य चरणम् अधः दत्तमस्ति । तत् पठित्वा भावं वदन्तु, लिखन्तु ।**

“भवता सृष्टं मालिन्यं
निधाय हृदयेऽशेषम् ।
निर्मलसर्गं रचयित्वा
विदधामो बहु सन्तोषम्” ॥

## III. स्वीयरचना



१. **भवन्तः पाठे वृक्षानधिकृत्य पठितवन्तः खलु ! तथैव भवतां परिसरे स्थिताः वृक्षाः कथम् उपकुर्वन्ति इति लिखन्तु ।**

२. **वृक्षाणां रक्षणाय भवन्तः किं कुर्वन्ति ?**

३. **गीतस्य सारांशं स्वीयवाक्यैः लिखन्तु ।**



SCERT TELANGANA

## IV. पदजालाभिवृद्धिः



१. वाक्यानि पठन्तु । रेखाङ्कितपदानि अवगच्छन्तु । तानि उपयुज्य वाक्यानि लिखन्तु ।

अ. सैनिकाः देशस्य रक्षां कुर्वन्ति ।

आ. शुद्धिं कृत्वा जलं पिबामः ।

इ. विद्यया ज्ञानवृद्धिं प्राप्नुमः ।

ई. बालिका कवितां पठति ।

२. अधः दत्तानि वाक्यानि सम्यक् पठन्तु । वाक्यद्वयं मेलयित्वा एकं वाक्यं लिखन्तु ।

उदा - अर्चकः देवालयं गच्छति । अर्चनां करोति ।

अर्चकः अर्चनां कर्तुं देवालयं गच्छति ।

अ. उपाध्यायः पाठशालां गच्छति । पाठं बोधयति ।

............................................

आ. छात्रः विद्यालयं गच्छति । परीक्षां लिखति ।

............................................

इ. वैद्यः वैद्यालयं गच्छति । चिकित्सां करोति ।

............................................

ई. चालकः बस् यानम् आरोहति । यानं चालयति ।

............................................

उ. माता भगवद्गीतां स्वीकरोति । पठति ।

............................................

उपरितनवाक्येषु वाक्यद्वयम् एकीकर्तुम् उपयुक्तं प्रत्ययं **'तुमुन्'** प्रत्ययः इति वदामः। यस्य पदस्य अन्ते तुमुन् प्रत्ययः भवति, तत् **तुमुन्प्रत्ययान्तपदम्** ।

३. अधः दत्तानि चित्राणि पश्यन्तु । चित्रे किं प्रदर्शितमिति ज्ञात्वा अधः दत्तक्रियापदसाहाय्येन कोष्ठकेषु वाक्यानि लिखन्तु ।



विकसति



प्रवहति



धावति



उपविशति



तिष्ठति



हसति

४. भवतां परिचितानां फलवृक्षाणां पुष्पवृक्षाणाञ्च नामानि अधः लिखन्तु ।

| फलवृक्षाणां नामानि | पुष्पवृक्षाणां नामानि |
|---|---|
| १. ............................ | १. ............................ |
| २. ............................ | २. ............................ |
| ३. ............................ | ३. ............................ |
| ४. ............................ | ४. ............................ |
| ५. ............................ | ५. ............................ |
| ६. ............................ | ६. ............................ |

SCERT TELANGANA

५. उदाहरणानुसारम् अक्षरविभागं कुर्वन्तु ।

| | | | | |
|---|---|---|---|---|
| जलमूलम् - | ज | ल | मू | लम् |
| | ज् + अ | ल् + अ | म् + ऊ | ल् + अ+ म् |

अ. काननवृद्धिम् ..............................

आ. गोसम्पत्तिम् ..............................

इ. पूजयामः ..............................

ई. वायुमण्डलम् ..............................

उ. निर्मलसर्गम् ..............................

## V. सर्जनात्मकव्यक्तीकरणम्



१. भवदभीष्टस्य वृक्षस्य चित्रं रचयन्तु ।

२. वृक्षे पत्राणि भवन्ति ।

वृक्षे पुष्पाणि भवन्ति ।

......... वृक्षे इतोऽपि किं किं भवति इति सरलसंस्कृतेन लिखन्तु ।

## VI. प्रशंसा



१. वृक्षेभ्यः अस्माकं बहुलाभाः भवन्ति खलु ! तर्हि वृक्षाणां रक्षणार्थं भवन्तः किं कुर्वन्तीति वदन्तु ।

२. केषाञ्चन औषधवृक्षाणां नामानि ज्ञात्वा वदन्तु ।

## VII. व्याकरणांशाः



१. अधः दत्तं वाक्यं पठन्तु । विवरणम् अवगच्छन्तु ।

बालकः पाठं पठति ।

- वाक्ये त्रीणि पदानि सन्ति । प्रथमं कर्तृपदम् । द्वितीयं कर्मपदम् । तृतीयं क्रियापदम् । एतादृशवाक्यं कर्मसहितवाक्यम् ।

SCERT TELANGANA

कर्ता इत्युक्ते कः, का, किम् इति प्रश्नानां समाधानम् ।

कर्म इत्युक्ते कम्, काम्, किम् इति प्रश्नानां समाधानम् ।

क्रिया इत्युक्ते किं करोति इत्यस्य समाधानम् ।

## २. कोष्ठकस्थानि पदानि उपयुज्य वाक्यानि रचयन्तु ।

| कः? का ? | किम् ? | किं करोति ? |
|---|---|---|
| उपाध्यायः, चालकः छात्रा, युवकः, अम्बा, | पूजां, वेदं पाठं, परीक्षां, चित्रं, वाहनम् | बोधयति, रचयति चालयति, करोति, पश्यति, वदति |

## ३. अधः दत्तं सम्भाषणं पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।

उपाध्यायः - पवन! भवान् पाठं पठतु ।

पवनः - महोदय! कं पाठं पठामि ? भवान् वदतु ।

उपाध्यायः - भवान् 'विवेकानन्दः' इति पाठं पठतु ।

पवनः - 'सर्वे जनाः सुखिनो भवन्तु' ।

**उपरि दत्तानां रेखाङ्कितपदानां विवरणम् अवगच्छन्तु ।**

'पठतु' इति पदम् आज्ञार्थं बोधयति ।

'वदतु' इति पदं प्रार्थनां बोधयति।

'भवन्तु' इति पदम् आशीर्वादार्थं, शुभाशयार्थं बोधयति ।

- ✷ **एतेषां क्रियापदानां 'लोट्' इति व्यवहारः ।**
- ✷ **लोट् लकारस्य सन्दर्भानुसारम् आज्ञा, प्रार्थना, निमन्त्रणादयः विविधाः अर्थाः सन्ति ।**



SCERT TELANGANA

४. **उदाहरणानुसारं क्रियापदं लोट्लकारे परिवर्त्य वाक्यं पुनः लिखन्तु । तदनुसारं कर्तृपदमपि परिवर्तयन्तु ।**

उदा - बालिका पाठशालां गच्छति ।

बालिका पाठशालां गच्छतु ।

अ. दीक्षा श्लोकान् पठति । ..........................

आ. माधवः कन्दुकेन क्रीडति । ..........................

इ. जनकः पत्रिकां पठति । ..........................

ई. अनुजा गृहकार्यं करोति । ..........................

उ. अग्रजः जलम् आनयति । ..........................



## परियोजनाकार्यम्

शीतकाले लभ्यमानानां पुष्पाणां फलानाञ्च चित्राणि सङ्गृह्य तेषां नामानि लिखित्वा भित्तिपत्रे संलग्नीकुर्वन्तु। तेषां विषये वाक्यद्वयं लिखन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. गीतं रागयुक्तं गातुं शक्नोमि । | आम् / न |
| २. गीतं पठित्वा, गीते स्थितानि प्रासाक्षरपदानि ज्ञातुं शक्नोमि । | आम् / न |
| ३. गीतभावं स्वीयवाक्यैः लेखितुं शक्नोमि । | आम् / न |
| ४. वृक्षाः अस्मभ्यं किं किं ददतीति अंशं सरलसंस्कृतेन कवितारूपेण लेखितुं शक्नोमि । | आम् / न |

**श्रद्धावान् लभते ज्ञानम् ।**

SCERT TELANGANA

**प्रथमः भागः**

# मशकराज्यम्

**पठन्तु, नन्दन्तु**



मशकपुरी नाम ग्रामः कश्चित् अस्ति। तत्र यः कोऽपि जनः जृम्भणादिकं कर्तुं यदा कदाचित् मुखम् उद्घाटयति तदा मुखे शतशः मशकाः प्रविश्य मुखगह्वरं पूरयन्ति । मुखे शतशः मशकाः एव मशकाः । मशकानां निर्मूलनार्थं ग्रामीणाः प्रयत्नं न कृतवन्तः । अतः मशकाः कोटिकोटिसङ्ख्याम् अतिक्रम्य वृद्धिं गताः। मनुष्याणां सङ्ख्या तु न्यूना जाता । अन्ते सः प्रान्तः सर्वः मशकराज्यमिति प्रसिद्धः अभवत् ।

सिंहासने विलासेन मशकराजः उपविष्टः अस्ति । महामात्यः राजानं दृष्ट्वा एवमवदत् -''महाराज! भाद्रपदमासतः पौष्यमासपर्यन्तम् अस्माकं कारणतः मनुष्याणां बहवः रोगाः भवन्ति। तेषु रोगेषु शीतज्वरः (మలేరియా) पादशोथः (బోదకాలు) इत्यादिसाङ्क्रमिकरोगाः सर्वत्र व्याप्य मानवान् निर्मूलयन्ति । तथा मानवजातेः निर्मूलनार्थं प्रणालिकाद्वयम् अहं सिद्धं कृतवान् ।

प्रथमप्रणालिकां श्रृणोतु । अनाफिलीस् जातीयाः मशक्यः जीर्णज्वरव्याधिं (టైఫాయిడ్) व्यापयन्ति। प्रतिजनं दंशनं कृत्वा मानवानां रक्ते सूक्ष्मजीविनः प्रेषयन्ति । एवं क्रमशः तेषां रोगवर्धनं भवति ।

द्वितीयप्रणालिकां श्रावयामि । मस्तिष्कशोथः (మెదడువాపు) वर्षद्वयदेशीयं बालम् आरभ्य द्वादशवर्षीयबालपर्यन्तम् एषः व्याधिः आगच्छति । सूक्ष्मजीविभ्यः व्याधिः सङ्क्रामति। अतः मशकसैनिकान् सर्वत्र प्रेषयन्तु । यत्र वराहाः, कालुष्यजलपूर्णानि पल्वलानि (బురదగుంటలు) कदम्बकाः अधिकाः भवन्ति तत्र अस्मत्सैन्यं गच्छेत्'' इति ।

मशकामात्यं प्रति मशकमहाराजः इत्थमवोचत् - 'मानवनिर्मूलनार्थं भवतः प्रणालिकाद्वयम् अद्भुतं महाद्भुतम् अस्ति' इति । सपदि एव सैन्याध्यक्षः 'अहमिदानीमेव सैन्यं स्वीकृत्य मानवान् आक्रम्य तान् निर्मूलयामि' इत्युक्त्वा ससैन्यं गतवान् । मशकानाम् आक्रमणेन मानवाः रोगग्रस्ताः अभवन् । केचन मानवाः मृताः, केचन मृतप्रायाः अभवन् ।

एवं स्थिते मशकान् निर्मूलयितुं सर्वैः मानवैः अपि एका गोष्ठी आयोजिता । वैद्यप्रमुखाः आगत्य रोगनिवारणोपायान् औषधानि च सूचितवन्तः । ''यत्र यत्र जलपूर्णाः गर्ताः सन्ति तान् मृत्तिकया पूरयन्तु । निम्बपत्राणि दग्ध्वा तद्धूमं मशकसञ्चारप्रदेशे व्यापयन्तु । स्थिरतया यत्र जलमस्ति तत्र तैलं स्थापयन्तु'' इत्यादिवैद्यसूचनाः जनाः सम्यक् पालितवन्तः । मशकाः मृताः । मशकपुर्याः पौराः मशकनिर्मूलनेन नितरां सन्तुष्टाः । आरोग्यं सम्पाद्य सुखजीवनं यापितवन्तः । ततःप्रभृति तस्य ग्रामस्य नाम आरोग्यपुरी इति प्रसिद्धम् अभवत् ।



SCERT TELANGANA

द्वितीयः भागः

# २. सर्वे भवन्तु सुखिनः

**चित्रं पश्यन्तु, विचिन्त्य, वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ?

२. चित्रे मनुष्यः कथं गच्छति ?

३. चित्रे जन्तवः किं कुर्वन्ति?

**उद्देश्यम्** - छात्रेषु जन्तूनां विषये दयागुणसंवर्धनम् । बुद्धिशक्तेः सत्कार्यकरणे उपयोगः ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।

SCERT TELANGANA



एकस्मिन् समये देवः सर्वानपि प्राणिनः द्रष्टुं तेषां समस्याः ज्ञातुं च इष्टवान् । अतः सः सभाम् एकां संयोज्य तत्र सर्वानपि जन्तून् मानवं च आगन्तुम् आदिष्टवान् ।

(शुकः पिकश्च गीतं गायतः, मयूरः नाट्यं करोति, गर्दभः अश्वश्च इतस्ततः धावनं कुरुतः, गजः गाम्भीर्येण पश्यति, हरिणाः परस्परं भाषमाणाः च सन्ति। सिंहः गर्जति ।)

(तदा द्वारपालकः उद्घोषयति - 'देवदेवः, सर्वेश्वरः, जगदीश्वरः, सृष्टिकर्ता, लयकर्ता सर्वव्यापी परमेश्वरः आगच्छन्नस्ति।' इति)

'देवदेव वर्धतां वर्धताम् अभिवर्धताम्' इति सर्वे वदन्ति ।

(देवः मानवेन सह सभां प्रविशति, सर्वे उत्थाय देवं नमस्कुर्वन्ति । देवः आशीर्वादं कृत्वा उपविशति। मानवः तस्य पार्श्वे उपविशति ।)

देवः - सर्वे कुशलिनः खलु ! मृगराज ! भवान् वदतु !

मृगराजः (सिंहः) - स्वामिन् ! भवतः परिपालने वयं सर्वे कुशलिनः । काले काले आहारं प्राप्नुमः । सुखेन जीवनं कुर्मः । किन्तु........

देवः - किन्तु.... किम् ?

गजः - महाराज ! वयं सुखेन जीवनं कुर्मः । किन्तु एषः मानवः एव अस्मान् बहुधा पीडयति । तस्य सामर्थ्यं किमस्ति ? किमर्थं भवानपि तस्मै प्राधान्यं ददाति?

अश्वः - किमर्थं भवता तस्य कृते आसनं कल्पितम् ? अस्माकं कृते आसनं किमर्थं नास्ति ?

देवः - भवतां प्रश्नम् अवगतवान् । एतस्मिन् विषये मानवमेव पृच्छन्तु । स एव वदति ।

शुकः - भोः मानव ! मम वाणी यथा मधुरा अस्ति तथा भवतः वाणी अस्ति वा ?



मानवः - सर्वथा नास्ति ।

पिकः - अहं यथा पञ्चमस्वरेण मधुरतया गायामि तथा भवान् गातुं शक्नोति किम् ?

मानवः - न शक्नोमि ।

हरिणः - मम शरीरं पश्यतु । बहु सुन्दरम् अस्ति । एतादृशं सौन्दर्यं भवतः अस्ति किम्?

गर्दभः - भोः ! अहं यथा परिश्रमं करोमि तथा भवान् परिश्रमं कर्तुं शक्नोति वा ?

मानवः - भोः गर्दभवर्य ! भवतः परिश्रमशक्तिः अपि मयि नास्ति । भवतः मूर्खत्वम् अपि मम नास्ति ।

मयूरः - मम नाट्यं दृष्ट्वा सर्वे सन्तुष्टाः भवन्ति । एतादृशं नाट्यकौशलं भवतः अस्ति किम् ?

मानवः - भोः मयूर ! भवतः नर्तनं बहु सुन्दरम् । मम तु एतादृशनर्तनकौशलं नास्ति ।

गजः - भो अल्पमानव ! मम शरीरं पश्यतु । मम बलं पश्यतु । अहम् उन्नतान् वृक्षानपि पातयितुं शक्नोमि ।

मानवः - गजराज! नमोऽस्तु ते ! भवतः बलं लोके कस्यापि नास्ति । अल्पस्य मम कथं स्यात्?

अश्वः - (हेषां कृत्वा) भोः ! मम वेगः अत्र कस्यापि अस्ति वा ?
भोः मानव ! भवानपि माम् अधिरुह्य एव प्रयाणं करोतीति स्मरतु । भवतः अपेक्षया अहमेव श्रेष्ठः ।

देवः - भोः मृगराज ! भवतः अभिप्रायं वदतु ?

सिंहः - देव ! वक्तुं किमस्ति? अस्मासु विद्यमानेषु गुणेषु एकः अपि गुणः अस्य मानवस्य नास्ति । एतत् सत्यं स्वयं मानवः एव अङ्गीकृतवान् । अतः एषः मानवः उन्नतस्थाने उपवेष्टुम् अनर्हः ।

मानवः - भो मृगराज ! भवता उक्तं सत्यमेव । भवत्सु इव सामर्थ्यं मयि नास्ति । किन्तु मम बुद्धिशक्तिः अस्ति । तेनाहं सर्वानपि स्ववशे स्थापयामि । सर्वं साधयाम्यपि ।



देवः - इदानीं ज्ञातं खलु ! मानवः बुद्धिशक्त्या सर्वेषामपेक्षया श्रेष्ठः । अतः मम पार्श्वे उपविष्टवान् ।

गजः - सत्यं वयमङ्गीकुर्मः । किन्तु एषः स्वबुद्धिशक्त्या भूलोकं नरकं कुर्वन्नस्ति । अस्मान् सर्वानपि पीडयन् अस्ति ।

हरिणः - देव ! तस्मै कृपया सद्बुद्धिं ददातु । तेन वयं सर्वे सुखेन जीवितुं शक्नुमः ।

देवः - अस्तु । तथास्तु । मानवस्य बुद्धिं सन्मार्गे प्रवर्तयिष्यामि ।

मानवः- ''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत् ॥''

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## एतानि कुर्वन्तु

### I. श्रृण्वन्तु, विचिन्त्य वदन्तु



१. एतस्य पाठस्य 'सर्वे भवन्तु सुखिनः' इति शीर्षिका समीचीना वा ? कथम्?

२. अश्वः मानवस्य प्रयाणसाधनं भवति खलु ! तथैव के के पशवः मानवस्य प्रयाणसाधनानि भवन्ति ?

३. के के पशवः कुत्र कुत्र वसन्तीति कथयन्तु ।

४. केचन पशवः साधवः, केचन क्रूरमृगाः भवन्तीति विषयं कथम् अवगन्तुं शक्नुमः ?

५. विहङ्गानां पशूनां च नाशं निरोद्धुं भवन्तः किं किं कर्तुम् इच्छन्ति ?

६. पाठं धारालतया पठन्तु, कथां स्ववाक्यैः वदन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठं पठित्वा पोष्यपशूनां नामानि लिखन्तु ।

२. पाठगतानां क्रूरमृगाणां नामानि वदन्तु लिखन्तु च ।

SCERT TELANGANA

३. **अधः वाक्यानि सन्ति । पठन्तु, पाठगतानां वाक्यानाम् अनुसारं पदानां क्रमं परिवर्त्य पुनः लिखन्तु ।**

अ. जीवनं कुर्मः वयं सुखेन ।

आ. पातयितुं वृक्षानपि शक्नोमि उन्नतान् ।

इ. अपेक्षया सर्वेषां श्रेष्ठः बुद्धिशक्त्या मानवः ।

ई. पश्यन्तु भद्राणि सर्वे ।

४. **अधः दत्ते परिच्छेदे दत्तानां चित्राणां स्थाने तेषां नामानि लिखित्वा पठन्तु ।**

बृन्दावनी पाठशालातः आगच्छन्ती वृक्षं पश्यति । वृक्षस्य शाखायां  उपविष्टवान्। वृक्षस्य अधः  विश्रान्तिं स्वीकरोति । मार्गे  आगच्छति । गृहस्य पुरतः  अस्ति। भित्तौ  म्याव् म्याव् वदति ।

## III. स्वीयरचना



१. **पाठम् अवगतवान् खलु ! भवतः कक्ष्यायां कः श्रेष्ठः किमर्थम् इति दशवाक्यैः लिखतु ?**

२. **देवस्य स्थाने भवान् भवति चेत् किं वदति ?**

३. **पाठे जन्तवः देवं प्रति स्वबाधाः उक्तवन्तः खलु ! तेषां बाधानिवारणाय भवान् कान् उपायान् वदति ?**

४. **पाठस्य विषये स्वाभिप्रायं लिखन्तु ।**

SCERT TELANGANA

## IV. पदजालाभिवृद्धिः



१. प्राणिनः कार्यं ज्ञात्वा योजयन्तु । ततः वाक्यरूपेण लिखन्तु ।

| क | ख |
|---|---|
|  | भारं वहति । |
|  | मधुरं वदति । |
|  | सुन्दरं नृत्यति । |
|  | वेगेन धावति । |
|  | पञ्चमस्वरे कूजति । |

२. मञ्जूषातः पदानि स्वीकृत्य वाक्यनिर्माणं कुर्वन्तु ।

| | |
|---|---|
| सिंहः, पिकः शुनकः, बिडालः मयूरः, काकः, गौः, वानरः, अश्वः | गर्जनम्, पञ्चमस्वरः, भषणम्, म्याव् म्याव्, केकारावम्, काव् काव्, अम्बा, किच् किच्, हेषारवम् |

३. अस्मिन् पाठे '!' इति चिह्नयुतानि पदानि सन्ति । अर्थानुसारं तानि अन्विष्य अत्र लिखन्तु ।

अ. కదా! –

आ. ఓ స్వామీ! –

इ. ఓ నరుడా! –

ई. ఓ సింహరాజా! –

उ. మహారాజా ! –

SCERT TELANGANA

४. एतानि वाक्यानि पाठे कः वदति, कं प्रति वदतीति लिखन्तु ।

| | कः वदति ? | कं प्रति वदति ? |
|---|---|---|
| उदा - देव ! तस्मै कृपया सद्बुद्धिं ददातु । तेन वयं सर्वे सुखेन जीवितुं शक्नुमः। | हरिणः | देवम् |
| अ. सर्वे कुशलिनः खलु ! मृगराज ! भवान् वदतु । | ............ | ............ |
| आ. महाराज! वयं सुखेन जीवनं कुर्मः । | ............ | ............ |
| इ. किमर्थं तस्य कृते उन्नतासनं कल्पितम् ? | ............ | ............ |
| ई. मम नाट्यं दृष्ट्वा सर्वे सन्तुष्टाः भवन्ति । | ............ | ............ |
| उ. गजराज! नमोऽस्तु ते । | ............ | ............ |
| ऊ. भोः मृगराज भवतः अभिप्रायं वदतु । | ............ | ............ |
| ए. इदानीं ज्ञातं खलु ! | ............ | ............ |
| ऐ. सत्यं, वयम् अङ्गीकुर्मः । | ............ | ............ |

## V. सर्जनात्मकव्यक्तीकरणम्



१. नाटकरूपेण पाठ्यांशविषयस्य अभिनयं कुर्वन्तु ।

२. पक्षिणां रक्षणार्थं किं करणीयमिति पञ्चवाक्यानि लिखन्तु ।

## VI. प्रशंसा



१. पक्षिणां जन्तूनां च नामानि अन्यभाषाभिः लिखन्तु ।

२. पक्षिजन्तुभिः सम्बद्धाः कथाः पठन्तु ।

## VII. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठित्वा रेखाङ्कितानां पदानाम् अर्थान् अवगच्छन्तु ।

अ. विद्युत् नास्ति अतः व्यजनं न भ्रमति ।

आ. अद्य पर्वदिनम् अतः पाठशालायाः विरामः अस्ति ।

**अत्र 'अतः' इति पदं कारणसूचकम् । एतत् अव्ययम् ।**



SCERT TELANGANA

**२. अतः इति अव्ययम् उपयुज्य कार्यकारणभावं सूचयन्तः वाक्यानि लिखन्तु ।**

अ. इन्धनं - वाहनम्

आ. वृष्टिः - छत्रम्

इ. शिरोवेदना - औषधम्

ई. क्षुधा - कदलीफलम्

**३. अधः दत्तम् उदाहरणद्वयं पठन्तु । विवरणम् अवगच्छन्तु ।**

उदा - अ) गण + ईशः = गणेशः (अ + ई = ए)

अत्र **'अ, ई'** इत्येतयोः वर्णयोः सन्निधौ सति तयोः स्थाने **'ए'** कारः सम्पन्नः । अयं च विकारः । अतः एषः सन्धिः ।

द्वयोः वर्णयोः सन्निधौ यदा विकारः भवति तदा सन्धिः इति उच्यते ।

विकारः नाम कस्यचित् वर्णस्य अदर्शनं कस्यचित् अन्यस्य वर्णस्य प्रयोगः वा।

आ) किम् + अकुर्वत = किमकुर्वत (म् + अ = म)

अत्र **'म्, अ'** इति वर्णयोः सन्निधौ सत्यपि कोऽपि विकारः न सम्पन्नः । केवलं **'म्, अ'** इत्यनयोः वर्णयोः स्थाने **'म'** इति लिखितम्। अतः एषः सन्धिः न भवति ।

**४. अधः दत्तानि पदानि सन्धिपदानि वा, न वा इति 'आम्', 'न' इत्येताभ्यां कोष्ठकेषु सूचयन्तु ।**

| | | | | | | आम्/न |
|---|---|---|---|---|---|---|
| अ. | नदी | + | अत्र | = | नद्यत्र | |
| आ. | महा | + | इन्द्रः | = | महेन्द्रः | |
| इ. | गृहम् | + | एव | = | गृहमेव | |
| ई. | भाषाम् | + | अधीते | = | भाषामधीते | |
| उ. | बालाः | + | अत्र | = | बाला अत्र | |
| ऊ. | मूलम् | + | इदम् | = | मूलमिदम् | |



SCERT TELANGANA



## परियोजनाकार्यम्

१. प्रवासि(వలస)पक्षिणां नामानि ज्ञात्वा तेषां चित्राणि सङ्गृह्य’ भित्तिपत्रे लेपयित्वा तान्यधिकृत्य लिखन्तु ।

२. जन्तूनां रक्षणार्थं विशेषप्रयत्नं कुर्वतीः “ब्लूक्रास्” सदृशीः संस्थाः गत्वा तत्र विषयसङ्ग्रहणं कृत्वा निवेदिकां(**Report**) विरच्य प्रदर्शयन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. पाठस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं शक्नोमि । | आम् / न |
| ३. वाक्यानि सम्यक्तया लेखितुं शक्नोमि । | आम् / न |
| ४. सर्वजीवेषु समभावनां प्रकटयितुं शक्नोमि । | आम् / न |
| ५. पाठ्यांशम् अभिनेतुं शक्नोमि । | आम् / न |

**अभ्यासो हि कर्मणां कौशलमावहति ।**

SCERT TELANGANA

द्वितीयः भागः

# ३. मैत्री

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ?

२. छात्राः किं धृतवन्तः ?
किमर्थम् ?

३. चित्रं दृष्ट्वा किं ज्ञातवान् ?

**उद्देश्यम् -**

उत्तममित्रस्य लक्षणानि बोधयित्वा छात्रेषु उत्तममैत्रीगुणस्य, ऋजुवर्तनस्य नैतिकमूल्यानां च संवर्धनम् ।

**छात्रेभ्यः सूचनाः -**

१. श्लोकान् पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।

SCERT TELANGANA

१. कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ॥

२. उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥

३. न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ॥





४. ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं मित्रलक्षणम् ॥

५. दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते ॥

६. पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

భావాః :

- శరీరమునకు చేతులమాదిరిగా, కన్నులకు కనురెప్పల మాదిరిగా, నాకు హాని కలుగుతుందేమోనని ఆలోచించకుండా, ప్రతిఫలం ఆశించకుండా ఎవడు మేలుచేస్తాడో అటువంటి మిత్రుడే నిజమైన మిత్రుడు.
- ఉపకారం చేయడం, ప్రియంగా మాట్లాడడం, స్వచ్ఛమైన స్నేహాన్ని అందించడం ఇవన్నీ సజ్జనులకు సహజసిద్ధమైనవి. చంద్రునికి చల్లదనాన్ని ఇవ్వమని ఎవరూ చెప్పలేదు కదా! చల్లగా ఉండడమే అతని స్వభావం.
- ఏ ఒక్కరూ ఏ ఒక్కరికీ స్నేహితుడూ కాడు. శత్రువు కూడా కాడు. స్నేహితులైనా, శత్రువులైనా కారణాల చేతనే (పరిస్థితులవల్లే) ఏర్పడుతారు.
- మంచి మిత్రునికి ఉండే ఆరు లక్షణాలను నీతిశాస్త్రకారులు ఈ విధంగా తెలిపారు. 1) మంచిమిత్రుడు మిత్రునికి కావలసినవి ఇస్తాడు. 2) తనకు కావలసినవి మొహమాటం లేకుండా తీసుకుంటాడు. 3) తన రహస్యాలను చెబుతాడు. 4) మిత్రుని రహస్యాలను అడుగుతాడు. 5) మిత్రుని వద్ద సంకోచం లేకుండా తింటాడు. 6) మిత్రునికి ఆనందంగా తినిపిస్తాడు.
- చూడడం, తాకడం, వినడం, మాట్లాడడం మొదలైనవి చేసేటప్పుడు ఎక్కడ మనసు ఆనందపడుతుందో అక్కడే నిజమైన స్నేహముందని పండితులంటారు.
- మంచిమిత్రుడు పాపం చేయకుండా నివారిస్తాడు. మంచిపనులు చేయమని ప్రోత్సహిస్తాడు. మిత్రుని రహస్యాలను దాచి, మంచి విషయాలనే అందరితో చెబుతాడు. ఆపదసమయంలో వదలకుండా వెంట ఉంటాడు. అవసరమైన సమయంలో కావలసింది ఇస్తాడు. ఇలా ఉండటం మంచిస్నేహితుని లక్షణమని సజ్జనులు అంటారు.

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. एते श्लोकाः किम् अधिकृत्य वदन्ति ?
२. पाठगतान् श्लोकान् भावयुक्ततया गायन्तु ।
३. एतेषु श्लोकेषु भवते कः श्लोकः रोचते ? किमर्थम् ?
४. एतस्य पाठ्यांशस्य ''मैत्री'' इति शीर्षिका उचिता वा ? कथम् ?
५. भवतः स्नेहितेषु उत्तमस्नेहितः कः ? तस्य उत्तमगुणाः के ?
६. गणद्वये उपविशन्तु, एकः गणः श्लोकं वदतु । अन्यः गणः भावं वदतु ।

SCERT TELANGANA

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. **अधः भावाः सन्ति । तेषां सम्बद्धान् श्लोकांशान् पाठे अन्विष्य तेषाम् अधः रेखाङ्कनं कुर्वन्तु तान् अंशान् पठन्तु च ।**

अ. ఎవడు ఆలోచించకుండ మిత్రునికి మేలు చేస్తాడో అతడే నిజమైన మిత్రుడు.
आ. ఆపదలో ఉన్నప్పుడు వదలిపెట్టడు.
इ. ఎవరు చంద్రుని చల్లగా మార్చారు?
ई. ఈ ఆరు మిత్రుని లక్షణాలు.

२. **पाठस्य आधारेण अधः दत्तानि वाक्यानि समीकृत्य लिखन्तु ।**

अ. अपकारः, अप्रियसम्भाषणम्, कृत्रिमस्नेहः - एतानि सज्जनानां लक्षणानि ।
आ. यः आलोच्य हितं करोति स एव मित्रम् ।
इ. यं दृष्ट्वा, स्पृष्ट्वा, उक्त्वा हृदयं न द्रवति स एव मित्रम् ।
ई. मानवाः परस्परम् अकारणेन मित्राणि भवन्ति ।
उ. सन्मित्रं हितान्निवारयति, पापाय योजयते ।

३. **अधः दत्तं परिच्छेदं पठित्वा, प्रश्नानां निर्माणं कुर्वन्तु ।**

भावनाहारिके उत्तमसख्यौ स्तः । भावना हारिकायै प्रतिदिनं पुष्पम् आनीय ददाति । हारिका स्वीकरोति । हारिका अपि गृहतः आनीतं मधुरं भावनायै दत्त्वा एव खादति । द्वे अपि परस्परं प्रियभाषणं कुरुतः ।

४. **पाठस्य आधारेण प्रश्नानां समाधानानि वदन्तु लिखन्तु च ।**

अ. किं सन्मित्रम् ?
आ. मित्रस्य स्वभावः कथं भवति ?
इ. मित्राणि, शत्रवः वा कथं जायन्ते ?
ई. मित्रस्य लक्षणानि कति ? तानि कानि ?
उ. स्नेहः इत्युक्ते किम् ?
ऊ. सन्तः सन्मित्रलक्षणं किमिति वदन्ति ?

## III. स्वीयरचना



१. **भवान् कीदृशैः सह मैत्रीं करोति ?**

२. **शरीरस्य अवयवाः अस्मान् उपकुर्वन्तीति जानन्ति खलु ! ते इव मित्रं कथम् उपकरोति ?**

३. **'षड्विधं मित्रलक्षणम्' - इति मित्रस्य षट् लक्षणानि ज्ञातवन्तः खलु ! भवन्तः मित्रस्य इतोऽपि षट् लक्षणानि वदन्तु ।**

४. **द्वयोः मध्ये मैत्री कथं जायते ? कारणानि लिखन्तु ।**

५. **पाठस्य साराशं स्वीयवाक्यैः लिखन्तु ।**

SCERT TELANGANA

## IV. पदजालाभिवृध्दिः



**१. समुचितपदैः कोष्ठकानि पूरयित्वा वाक्यं रचयन्तु ।**

अ. ______ ______ गच्छति ।

आ. सीता ______ ______ ।

इ. ______ पाठशालां ______ ।

ई. ______ ______ कर्तुं ______ ______ ।

**२. उदाहरणस्य साहाय्येन वाक्येषु पदानां क्रमं लिखन्तु ।**

उदा ॥ पापात् निवारयति सन्मित्रम् ।
सन्मित्रं पापात् निवारयति ।

अ. हिताय योजयते सन्मित्रम् ।

आ. गुणान् सन्मित्रम् प्रकटीकरोति ।

इ. कुर्यात् प्रियं मित्रम् अविचार्य ।

**३. चक्रस्य साहाय्येन मित्रं किं किं करोतीति वदन्तु लिखन्तु च ।**




**षड्विधं मित्रलक्षणम्**

१. ........................
२. ........................
३. ........................
४. ........................
५. ........................
६. ........................

**४. 'तुमुन्' प्रत्ययान्तपदम् उपयुज्य वाक्यसंयोजनं कृत्वा लिखन्तु ।**

उदा - छात्रः विद्यालयं गच्छति । पाठं पठति ।
छात्रः पाठं पठितुं विद्यालयं गच्छति ।

अ. यात्रिकः नदीं गच्छति । स्नानं करोति ।

आ. वाणी कदलीफलं स्वीकरोति । खादति ।

SCERT TELANGANA

इ.  भास्करः पुस्तकं क्रीणाति । पठति ।
ई.  पावनी कवितां श्रुणोति । लिखति ।
उ.  प्रणवः श्लोकं लिखति । गायति ।

**५. मञ्जूषायां विद्यमानं विरुद्धार्थबोधकं पदं स्वीकृत्य वाक्यं पुनः रचयन्तु ।**

स्वीकुर्वन्ति, शत्रुः, अविचार्य, अहितम्

अ.  कुचेलः श्रीकृष्णस्य **मित्रम्** ।
    कंसः .................................. ।
आ.  सर्वाणि कार्याणि **विचार्य** करणीयानि ।
    .............................. न करणीयानि ।
इ.  मेघाः पृथिव्यै जलं **यच्छन्ति** ।
    वृक्षाः पृथिव्याः ........................।
ई.  सज्जनः समाजाय **हितं** करोति ।
    दुर्जनः .................................. ।

**६. उपरितनवाक्यानि अनुसृत्य एतैः पदैः वाक्यानि निर्मान्तु ।**

अ.  गुणाः  x  दोषाः
आ.  कारणम्  x  अकारणम्
इ.  कृत्रिमम्  x  सहजम्

## V. सर्जनात्मकव्यक्तीकरणम्



**१. पाठ्यभागस्य सारम् आधारीकृत्य मित्राय पत्रं लिखन्तु ।**

**२. अधः आन्ध्रभाषया कविता दत्ता अस्ति । पठन्तु, संस्कृतेन परिवर्त्य लिखन्तु ।**

నేస్తాలు మన నేస్తాలు.
కల్లాకపటం తెలియనివారు
కష్టాల్లో కాపాడేవారు
తోడుగ నీడగ ఉండేవారు ॥ నేస్తాలు ॥

## VI. प्रशंसा



**१. अधः दत्तानि वाक्यानि पठतु । भवान् किं करोति, किं न करोतीति जानातु।**

अ.  अहं मित्राय सर्वदा साहाय्यं करोमि ।
आ.  अहं मित्रम् असत्यं न वदामि ।

SCERT TELANGANA

इ.  अहं मित्राय क्रुद्धः न भवामि ।
ई.  मम वस्तूनि मित्रस्य उपयोगाय ददामि ।
उ.  अहं मित्रैः सह क्रीडामि ।
ऊ.  मम अज्ञातान् विषयान् मित्रं पृच्छामि ।

## VII. व्याकरणांशाः



**१. उदाहरणानुसारं पदविभागं कुर्वन्तु ।**

उदा - स्नेहमकृत्रिमम् - स्नेहम् + अकृत्रिमम्

अ. गुह्यमाख्याति = ........ + ...........
आ. मित्रमुच्यते = ........ + ...........
इ. लक्षणमिदम् = ........ + ...........
ई. छायामाश्रितः = ........ + ...........
उ. स्वयमेव = ........ + ...........

**२. उदाहरणानुसारं पदानि योजयन्तु ।**

उदा - एवम् + एव = एवमेव
अ. इदम् + अत्र = ........................
आ. त्वम् + अपि = ........................
इ, कथाम् + उपदिशति = ........................
ई, सर्वम् + ऐश्वर्यम् = ........................

**३. पदानि विघटयन्तु ।**

अ. सन्मित्रम् = ................ + ................
आ. षड्विधम् = ................ + ................
इ. केनेन्दुः = ................ + ................
ई. नेत्रयोरिव = ................ + ................

**४. वाक्यानि पठन्तु, रेखाङ्कितानि पदानि अवगच्छन्तु ।**

अ. किशोरः अम्बायाः वचनं श्रुत्वा स्नानार्थं गतवान् ।
आ. गोपालः स्नानं कृत्वा पूजां करोति ।
इ. गौतमः क्रीडित्वा पाठं पठति ।

**उपरितनवाक्येषु रेखाङ्कितानि पदानि 'क्त्वा' प्रत्ययान्तानि ।**



SCERT TELANGANA

५. **वाक्यानि पठन्तु, रेखाङ्कितानि पदानि अवगच्छन्तु ।**

अ. सिद्धार्थः उपविश्य पाठं पठति ।

आ. वाणी आगत्य परीक्षां लिखति ।

इ. पितामही उपनेत्रं विस्मृत्य गतवती ।

**उपरितनवाक्येषु रेखाङ्कितानि पदानि ल्यप् प्रत्ययान्तानि ।**

६. **अधः आवरणे दत्तैः क्रियापदैः सह ल्यप्-क्त्वा प्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयन्तु ।**

नन्दकिशोरः प्रातः..........(उत्तिष्ठति) दन्तधावनं करोति । स्नानं........(करोति) देवं पूजयति । अल्पाहारं करोति । ततः विद्यालयं..........(गच्छति) कक्ष्यायाम्.........(उपविशति) पाठान् शृणोति ।

७. **अधः क्रियापदानि सन्ति । मित्राणाम् उपाध्यायस्य वा साहाय्येन तैः क्त्वा प्रत्ययं, ल्यप् प्रत्ययं वा योजयित्वा लिखन्तु ।**

उदा - क्त्वा - धावति - धावित्वा

ल्यप् - प्रक्षालयति - प्रक्षाल्य

| | |
|---|---|
| १. पिबति | ६. विचारयति |
| २. शृणोति | ७. विस्मरति |
| ३. लिखति | ८. आनयति |
| ४. पठति | ९. आगच्छति |
| ५. नमति | १०. विलिखति |



## परियोजनाकार्यम्

मैत्रीसम्बद्धान् श्लोकान् सङ्गृह्य, लिखित्वा भित्तिपत्रे संलग्नीकुर्वन्तु । तेषां भावान् च लिखित्वा कक्ष्यायां श्रावयन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. श्लोकान् रागयुक्ततया / भावयुक्ततया पठितुं शक्नोमि । | आम् / न |
| २. पाठस्य आधारेण वाक्यानि संस्कृतीकर्तुं शक्नोमि । | आम् / न |
| ३. पाठसारं स्वीयवाक्यैः लेखितुं शक्नोमि । | आम् / न |

**सत्यं वद । धर्मं चर ।**

SCERT TELANGANA

द्वितीयः भागः

# ज्ञानोदयः

पठन्तु, नन्दन्तु

अवन्तीदेशस्य राजा गुणवर्मा । सः अत्यन्तमूर्खः । कोशाभिवृद्ध्यै सः सर्ववस्तुषु करं (పన్ను) विहितवान् । जनाः सर्वे तस्य पालने क्लेशान् अनुभवन्ति स्म । मन्त्रिणा अनेकवारं सूचितस्यापि तस्य मनसि परिवर्तनं नासीत् ।

तस्य राज्ये एका नदी प्रवहति स्म । नदीजलं पश्चिमतः पूर्वदिशं गच्छति स्म । राज्ञा चिन्तितं यत् 'एतेन नदीजलेन पूर्वदिशि विद्यमानस्य प्रवस्तदेशस्य सस्यानि फलन्ति । तत्रस्थजनाः सर्वे मम नदीजलमेव पिबन्ति । अतः जलविनियोगाय तद्देशराजेन करः दातव्यः' इति । मन्त्रिणं च तं विषयम् अकथयत् । तदा मन्त्रिणा उक्तं यत् ''जलं तु सार्वजनीनम् । तत् न अस्माकं स्वकीयमिति'' । मूर्खः राजा मन्त्रिणम् आदिशत् यत् ''प्राग्देशीयाः यदि करं न दास्यन्ति तर्हि वयं नद्याः जलं न दद्मः'' इति । नदीजलं स्थगितं भवति, तर्हि अवन्तीदेशस्य हानिरेव भवति इति मन्त्रिणा चिन्तितम् । एकः तरणोपायः तस्य मनसि अस्फुरत् । समनन्तरमेव मन्त्री राज्ञः अन्तःपुरे घण्टावादकं भटमेवम् उक्तवान् - साधारणतया रात्रौ समयज्ञापनार्थं घण्टावादनं भवति । अद्य अर्धघण्टासमये पूर्णघण्टावादनं करोतु इति । तदर्थं रात्रौ दशवादने दशघण्टाः सार्धदशवादने एकादशघण्टाः, एकादशवादने द्वादशघण्टाः वादनीयाः इति च। इत्थं कृते सार्धैकवादने एव पञ्चमघण्टावादनम् अभवत् । प्रातः पञ्चवादनमभवदिति राजा जागृतवान् । किन्तु सूर्योदयः नाभवत् । आकाशे सूर्यः न आगच्छत् । तेन व्याकुलचित्तः राजा मन्त्रिणमाहूय सूर्यस्य अनागमनकारणम् अपृच्छत् । मन्त्रिणा उक्तं यत्- भवता जलं न प्रेषितं, प्रवस्तराजा कुपितः सन् सूर्यं न प्रेषितवान् इति। राज्ञा चिन्तितं यदि सूर्यः न उदेति, जीवनमेव कष्टं भवति । ''इदानीं किं कर्तव्यम् ?'' इति राजा मन्त्रिणं पृष्टवान् । मन्त्रिणा उक्तम् - ''अस्माभिः जलं प्रेष्यते चेत् सः अवश्यं सूर्यं प्रेषयिष्यति'' इति । राज्ञा ''तथैव कुरु अस्माकं तु सूर्यः आवश्यकः'' इति उक्तम् ।



मन्त्री - ''राजन् ! भवान् निद्रातु, प्रवस्तराजा तु दयामयः । सः सूर्यम् अवश्यं प्रेषयिष्यति'' इति अवदत् । राजा अन्तःपुरं गत्वा सुप्तवान् । सूर्योदयः अभवत्, राजा च सूर्यं दृष्ट्वा मुदितः अभवत् ।

# ४. बाल्यं खलु विद्यायै

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**




**प्रश्नाः**

१. चित्रे के के सन्ति ?

२. चित्रे बालाः किं कुर्वन्ति ?

३. बालानां तादृशकार्याणि समुचितानि वा ?

**उद्देश्यम्** - १. छात्रेषु "बालकार्मिकान् पाठशालां प्रति आनयामः" इति भावनायाः जागरणम् ।
२. दैनन्दिन्याः लेखनाभ्यासस्य वर्धनम् ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।
२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।
३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।

SCERT TELANGANA




किशोरः नगरपालकसंस्थायाः गान्धीजी उन्नतपाठशालायाम् अष्टमकक्ष्यायां पठति । तस्य जनकः वस्त्रापणे लिपिकः । किशोरस्य "दिनचर्यालेखनाभ्यासः" अस्ति । तस्य दैनन्दिन्याम् अत्यन्तम् उत्कण्ठभरितं दिनद्वयम् अधिकृत्य पठामः वा ?

'कौसल्यासुप्रजा राम ! पूर्वा सन्ध्या प्रवर्तते' ..... देवालयस्य ध्वनिविस्तारकतः सुप्रभातस्तोत्रं श्रुण्वन् अहं निद्रातः उत्थितवान् । कालकृत्यानि समाप्य पूर्वमेव सिद्धेन जनकेन सह प्रातश्चलनार्थं गच्छन् जनकस्य द्विचक्रिकां दृष्टवान् ।

द्विचक्रिकायाः दर्शनेन मणिकण्ठः स्मरणे आगतः । मणिकण्ठः अस्माकं शालायामेव पञ्चमकक्ष्यापर्यन्तं पठितवान् । निर्धनः तस्य जनकः त्रयाणां पुत्राणां पालनं कष्टकरमिति चिन्तयित्वा तं द्विचक्रिकाणां समीकरागारे कार्यार्थं नियुक्तवान् ।



अहं जनकेन सह वेगेन पुरतः चलामि स्म । किन्तु मम चिन्तनानि पृष्ठतः गच्छन्ति स्म । गृहागमनानन्तरम् अम्बा क्षीरं दत्तवती । अहम् अन्यमनस्कः सन् पीतवान् । स्नानं च कृतवान्। पूजार्थमुपविष्टवान् । मम मनसि देवस्य स्मरणं नास्ति । नेत्रे निमील्य मणिकण्ठमेव स्मरामि स्म ।

SCERT TELANGANA

“किमर्थं सः पठशालां त्यक्तवान् ?”

“समीकरागारं किमर्थं प्रविष्टवान् ?”



ततः अहम् अवशिष्टं गृहकार्यं समाप्य अल्पाहारार्थमुपविष्टवान् । हस्तः स्थालिकायाम् अस्ति । मनस्तु तत्रैवास्ति ।

मणिकण्ठः उत्तमबालकः मेधावी च । सः पठति चेत् अवश्यमेव उन्नतस्थानं प्राप्नोति । अहं गत्वा वदामि चेत् तस्य जनकः न शृणुयात् इति मम संशयः ।

“स्थालिकायां हस्तं निधाय किं चिन्तयति ?” शीघ्रं खादतु उक्तवती पितामही जपमालां वर्तयन्ती ।



ततः पाठशालां प्रति गमनसमये जनकः पृष्टवान् “वत्स किं चिन्तयति ?” जनकस्य स्वरगतं प्रेम मकरन्दादपि मधुरमासीत् ।

“उत्तमविद्यार्थी मणिकण्ठः पाठशालां त्यक्त्वा बालकार्मिकः जातः । सः रक्षणीयः । तस्य जनकेन सह भवान् भाषणं करोतु” इति अहं जनकं बहुधा प्रार्थितवान्। जनकस्तु मौनेन शिरः कम्पयन् “अस्तु प्रयत्नं कुर्मः” इत्यवदत् । समाधानं लघु अपि तस्य पृष्ठतः कमपि निर्णयं लक्षितवानहम् । ततोऽहं पाठशालां प्रविश्य दैनन्दिनव्यवहारेषु व्यग्रः अभवम् । शनिवासरं भानुवासरं च एवमेव कष्टेन यापितवान् ।



अद्य सोमवासरः । प्रतिदिनमिव प्रातरुत्थाय प्रातश्चलन-योगाभ्यासादिकार्याणि समाप्य पाठशालां प्रति प्रस्थितः । जनकः द्विचक्रिकां चालयति स्म । अहं तु पृष्ठतः उपविश्य किमपि

SCERT TELANGANA

चिन्तयामि स्म । मार्गे द्विचक्रिकागारे मणिकण्ठः न दृष्टः । सः कुत्र गतवान् ? किम् अभवत् तस्य ? एतत् कार्यं त्यक्त्वा अन्यकार्ये प्रविष्टवान् वा ? किं कुर्मः ''ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते'' इति पितामही सर्वदा वदति इत्यादि चिन्तयन्नेव पाठशालां प्रविष्टवान् ।

आश्चर्यम् । तत्र पुरतः मणिकण्ठः तस्य जनकेन सह आगतवान् । तस्य स्कन्धे पुस्तकस्यूतः मुखे आनन्दः च दृश्यते । तस्य जनकः मम जनकस्य समीपमागत्य ''नमस्ते महोदय ! भवान् मम गृहमागत्य सकाले उत्तमविचारान् उक्तवान् । तेन प्रेरितः अहं मम पुत्रं पाठशालां प्रवेशितवान्'' इत्यादिकं बहु वदन् आसीत् । मणिकण्ठस्तु मौनेन मामेव पश्यति स्म । तस्य दृष्टौ कृतज्ञता । मम मनसि सफलता । तस्मिन् क्षणे अहं महान्तम् आनन्दम् अनुभूतवान् । तादृशमानन्दं जीवने कदापि नानुभूतवान् । तादृशः एव आनन्दः मम पुनरावश्यकः ।

## एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. पाठ्यांशचित्रे के के सन्ति ? ते किं कुर्वन्ति ?

२. दिनचर्यां कः लिखितवान् ? किमिति लिखितवान् ?

३. साधारणदिनचर्यायाः एतस्याः च कः भेदः ?

४. ''बालाः सर्वे पाठशालां गच्छेयुः । केऽपि बालाः बालकार्मिकाः न भवेयुः।'' एतद्विषये भवतः अभिप्रायः कः ?

५. किशोरः दैनन्दिनीं लिखितवान् । भवान् कदापि दैनन्दिनीं लिखितवान् वा ? लिखति चेत् कं विषयमधिकृत्य लिखति ?

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु





१. नामवाचकयुतानि वाक्यानि पाठे अन्विष्य लिखन्तु ।

२. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

मेघना प्रतिदिनं प्रातः पञ्चवादने उत्तिष्ठति । सा तस्याः जनकेन सह व्यायामं करोति । सार्धषड्वादने स्नानं करोति । सप्तवादने पूजां कृत्वा सार्धसप्तवादनतः सार्धाष्टवादनपर्यन्तं पाठ्यांशान् पठति । सार्धाष्टवादने अल्पाहारं स्वीकृत्य पाठशालां गच्छति । सार्धनववादनतः सायं विंशत्यूनपञ्चवादनपर्यन्तं पाठशालायां भवति । सा पञ्चवादने गृहमागच्छति,

SCERT TELANGANA

सपादपञ्चवादनतः षड्वादनपर्यन्तं क्रीडति । सार्धषड्वादनतः सप्तवादनपर्यन्तं पूजां करोति । सप्तवादनतः नववादनपर्यन्तं पठति । नववादने भोजनं करोति। दशवादनतः प्रातः पञ्चवादनपर्यन्तं निद्रां करोति ।

अ. मेघना प्रतिदिनं कदा उत्तिष्ठति ? ..................

आ. मेघना अल्पाहारात् पूर्वं किं किं करोति ? ..................

इ. मेघनायाः पाठशालासमयः कः ? ..................

ई. मेघना कदा क्रीडति ? ..................

उ. मेघना कदा निद्राति ? ..................

**३. पाठं पठन्तु । पाठस्य आधारेण पट्टिकां पूरयन्तु ।**

| पाठे परिच्छेदसङ्ख्या | तस्मिन् परिच्छेदे मुख्यानि पदानि |
|---|---|
| द्वितीयपरिच्छेदः | |
| षष्ठपरिच्छेदः | |
| अष्टमपरिच्छेदः | |

**४. अधः दत्तानि वाक्यानि कः कं प्रति उक्तवान् इति लिखन्तु ।**

अ. तस्य जनकेन सह भवान् भाषणं करोतु ।

आ. ''वत्स ! किं चिन्तयति'' इति ।

इ. ''स्थालिकायां हस्तं निधाय किं चिन्तयति भवान् ?''

ई. ''अहं मम पुत्रं पाठशालां प्रवेशितवान् ।

**५. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

अ. किशोरः प्रतिदिनं प्रातः किं करोति ?

आ. किशोरः मणिकण्ठमधिकृत्य किं चिन्तयति ?

इ. किशोरः कीदृशमानन्दं प्राप्तवान् ?

SCERT TELANGANA

## III. स्वीयरचना



१. 'पाठशालां ये न गच्छन्ति, ते सर्वेऽपि बालकार्मिका एव ।' एतद्विषये भवतः अभिप्रायः कः ?

२. सर्वकारीयपाठशालासु छात्रेभ्यः कानि कानि आनुकूल्यानि सन्ति ?

३. बालकार्मिकाय किशोरेण कृतं साहाय्यं ज्ञातवन्तः खलु ! पाठशालां प्रविश्य बालकार्मिकाः कीदृशीः समस्याः अनुभवन्ति ? तेभ्यः भवान् कीदृशं साहाय्यं करोति इति लिखतु ।

४. किशोरस्य जनकः मणिकण्ठस्य जनकं किमुक्तवान् स्यात् इति ऊहित्वा लिखन्तु ।

## IV. पदजालाभिवृद्धिः



१. उदाहरणानुसारं धातुं विभज्य लिखन्तु ।

उदा - स्नाति - स्नानं करोति ।

अ. भुङ्क्ते = ....................

आ. निद्राति = ....................

इ. पूजयति = ....................

ई. चिन्तयति = ....................

उ. प्रयतते = ....................

ऊ. चिनोति = ....................

२. वाक्यानि पठन्तु । रेखाङ्कितपदानाम् अर्थान् अवगच्छन्तु ।

अ. गृहनिर्माणार्थं धनम् आवश्यकम् ।

आ. धनार्थं कार्यं करणीयम् ।

इ. कार्यार्थम् प्रयत्नः आवश्यकः ।



SCERT TELANGANA

३. उपरितनवाक्येषु रेखाङ्कितपदानि ज्ञात्वा, अधः दत्तानि वाक्यानि पूरयन्तु।

अध्यापकः ............... (बोधनं) विद्यालयम् आगच्छति । छात्राः ......... (पठनं) विद्यालयम् आगच्छन्ति । विद्याधिकारी ....... (पर्यवेक्षणम्) विद्यालयम् आगच्छति । मातापितरः बालकान् ............ (किम्) विद्यालयं प्रेषयन्ति ?

## V. सर्जनात्मकव्यक्तीकरणम्



१. किशोरः इव भवन्तः अपि दिनचर्यां लिखित्वा आनयन्तु ।

२. मणिकण्ठः पाठशालां प्रविष्टवान् खलु ! मणिकण्ठं दृष्ट्वा किशोरः विस्मितः अभवत् । मणिकण्ठः किशोरस्य समीपमागत्य धन्यवादान् वदति इत्येतं सन्दर्भम् आधारीकृत्य तयोः मध्ये प्रचलितं सम्भाषणं लिखन्तु ।

३. संस्कृतेन अनुवदन्तु ।

अ. కిరణ్ నాన్నతో కలసి దేవాలయానికి వెళ్లాడు.

आ. రమ అమ్మతో కలిసి పాట పాడింది.

इ. విద్యార్థులు చెట్ల కింద ఆడుకుంటున్నారు.

ई. నేను బాగా చదివి ప్రజలకు సేవ చేస్తాను.

उ. వైద్యుడు రోగులకు సేవ చేస్తున్నాడు.

## VI. प्रशंसा



पाठे किशोरमधिकृत्य ज्ञातवन्तः खलु ! किशोरः भवताम् एव मित्रं इति मत्वा तस्य अभिनन्दनं कुर्वन्तः लेखं लिखन्तु ।

SCERT TELANGANA

## VII. व्याकरणांशाः



**१. अधः दत्तानि वाक्यानि अवगच्छन्तु ।**

अ. छात्रः परीक्षाम् अलिखत् ।

छात्रः परीक्षां लिखितवान् ।

आ. सीता भोजनम् अकरोत् ।

सीता भोजनं कृतवती ।

इ. बालकाः कन्दुकेन अक्रीडन् ।

बालकाः कन्दुकेन क्रीडितवन्तः ।

ई. महिलाः यात्राम् अगच्छन् ।

महिलाः यात्रां गतवत्यः ।

उपरि दत्तानि अलिखत्, अकरोत् इत्यादिक्रियापदानि तत्तद्धातूनां लङन्तरूपाणि । लिखितवान्, कृतवती इत्यादीनि **'क्तवतु'** प्रत्ययान्तरूपाणि।

**२. उपरि दत्तानाम् उदाहरणानाम् आधारेण अधः दत्तानि वाक्यानि क्तवतु प्रत्ययमुपयुज्य परिवर्त्य लिखन्तु ।**

अ. उपाध्यायः पाठम् अबोधयत् ।

आ. शिष्याः श्लोकम् अपठन् ।

इ. भगिन्यः कविताः अलिखन् ।

इ. भारतीयाः गणतन्त्रदिनोत्सवम् अकुर्वन् ।

ई. श्रीकृष्णः अर्जुनं गीताम् अवदत् ।

उ. तरुण्यः रङ्गवल्लिकाः अरचयन् ।

**३. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।**

यथा - परमार्थः = परम + अर्थः ( अ + अ = आ )

कवीन्द्रः = कवि + इन्द्रः ( इ + इ = ई )

भानूदयः = भानु + उदयः ( उ + उ = ऊ )

**उपरि दत्तेषु उदाहरणेषु**

अकारस्य अकारे परे आकारः,

इकारस्य इकारे परे ईकारः,

उकारस्य उकारे परे ऊकारः आगतः ।

**एतानि सवर्णदीर्घसन्धियुक्तानि पदानि ।**

- अ, इ, उ, ऋ इत्येषां वर्णानां सवर्णे अचि परे तेषां दीर्घः एकादेशः भवति ।

अयं **सवर्णदीर्घसन्धिः** इति उच्यते ।

### ४. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।

१. लेखनाभ्यासः = ........... + ...........

२. देवालयः = ........... + ...........

३. महीशः = ........... + ...........

४. कवीश्वरः = ........... + ...........

५. वधूत्साहः = ........... + ...........

### ५. अधः दत्तानां पदानां योजनं कुर्वन्तु ।

अ. विद्या + आलयः = ..............................

आ. कवि + ईशः = ..............................

इ. पृथिवी + इन्द्रः = ..............................

ई. गुरु + उपदेशः = ..............................

उ. न + अन्यथा = ..............................



SCERT TELANGANA

४. पाठगतानि 'क्त्वा' प्रत्ययान्तानि, 'ल्यप्' प्रत्ययान्तानि च पदानि अन्विष्य अत्र लिखन्तु ।

| क्त्वाप्रत्ययान्तानि | ल्यप्प्रत्ययान्तानि |
| --- | --- |
| | |



## परियोजनाकार्यम्

बालकार्मिकव्यवस्थायाः निर्मूलनार्थं सर्वकारः कान् मार्गान् अनुसरति? विद्याशाखाजनान्, कार्मिकजनान्, उपाध्यायान् अन्यान् च पृष्ट्वा, विषयसङ्ग्रहणं कृत्वा कक्ष्यायां वदन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
| --- | --- |
| १. प्रतिदिनं कृतानि कार्याणि दिनचर्यायां लेखितुं शक्नोमि । | आम् / न |
| २. पाठे स्थितानि नामवाचकपदानि अभिज्ञातुं शक्नोमि । | आम् / न |
| ३. बालकार्मिकानां समस्याः अवगत्य, तेषां साहाय्यं कर्तुं शक्नोमि । | आम् / न |
| ४. पाठं सम्भाषणरूपेण लेखितुं शक्नोमि । | आम् / न |

**परोपकारः पुण्याय पापाय परपीडनम् ।**

SCERT TELANGANA

तृतीयः भागः

# ५. सन्देशः

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**




**प्रश्नाः**

१. उपरितनं भित्तिपत्रं किमधिकृत्य वदति ? एतादृशं भित्तिपत्रं कदापि दृष्टवान् वा ?
२. कस्य देवस्य ब्रह्मोत्सवः प्रचलति ?
३. ब्रह्मोत्सवः कस्मिन् प्रदेशे प्रचलति ? कति दिनानि प्रचलति ?

**उद्देश्यम्** - संस्कृतमासपत्रिकायाः परिचयः । भित्तिपत्रस्य विशेषतायाः ज्ञापनम् ।

**छात्रेभ्यः सूचनाः -**

१. सम्भाषणं पठन्तु, अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।
२. अनवगतपदानाम् अर्थविषये मित्रैः सह चर्चां कुर्वन्तु ।
३. पाठ्यपुस्तकान्ते दत्तं पदकोशं दृष्ट्वा अर्थान् जानन्तु ।

(पौत्रः पितामहः द्वावपि देवालयं गच्छतः । देवालयस्य पुरतः पौत्रः एकं भित्तिपत्रं दृष्टवान् ।)

शिवः - पितामह! क्षणं तिष्ठतु । अत्र किमपि भित्तिपत्रं मम मनः आकर्षति, पठित्वा आगच्छामि ।

पितामहः - भवतु, पौत्र ! तत्पत्रम् अहमपि पठामि ।

शिवः - सम्भाषणसन्देशः बेङ्गलूरुतः प्रकाश्यमाना संस्कृतमासपत्रिका (इति पठित्वा) पितामह ! भवान् एतां संस्कृतमासपत्रिकां जानाति वा ?



पितामहः - वत्स ! एतां पत्रिकाम् अहं जानामि ।

शिवः - तथा वा अत्र संस्कृतभारती इत्यपि अस्ति। सापि काचन पत्रिका वा ?

पितामहः - भद्र ! संस्कृतभारती इति पत्रिका न, संस्कृतभाषायाः प्रचारं कुर्वती काचन स्वच्छन्दसंस्था । देशे विदेशेषु च संस्कृतप्रचारार्थम् इयं संस्था बहुविधानि कार्याणि करोति । तेषु प्रचारकार्येषु मासपत्रिकायाः प्रकाशनमपि अन्यतमं कार्यम् ।

शिवः - पितामह ! एतत् सर्वं भित्तिपत्रे नास्ति। भवान् कथं जानाति ?

पितामहः - भवतः संस्कृताध्यापिका रत्नावलीभगिनी कदाचित् मां सन्देशपत्रिकाविषये अवदत्। तथा च तस्यां 'सर्वेऽपि विषयाः सरलसंस्कृतेन लिखिताः सर्वेषां सुबोधाः भवन्ति' इति उक्तवती। अहं द्वित्रवारं तां पत्रिकां पठितवान् ।

शिवः - इत्युक्ते तेलुगुपत्रिकासु इव अत्रापि कथाः, हास्यकणिकाः चित्राणि च भवन्ति वा ?

SCERT TELANGANA

पितामहः - अथ किम् ? बालानां कृते बालमोदिनी नाम्ना कथाः, चित्रकथाः भवन्ति ।एवं धारावाह्यः, संस्कृतवार्ताः, गीतानि, वैज्ञानिकांशाः, भाषाविषयकाः, प्रबन्धः, निघण्टुः, पदरञ्जनी, हास्यकणिकाः इत्यादयः बहवः विषयाः अस्यां पत्रिकायां भवन्ति ।




**समाजस्य हितम्** **संस्कृते निहितम्**

## सम्भाषणसन्देशः

कथा - विज्ञान - भाषाभ्यास - भाषापाठ - आधुनिकवार्ता - हास्य - विविधलेखैः युक्ता, संस्कृतभारत्या बेङ्गलूरुतः प्रकाश्यमाना संस्कृतमासपत्रिका।

वार्षिकग्राहकशुल्कम् - रू ११०/-
द्वैवार्षिकग्राहकशुल्कम् - रू २१०/-
त्रैवार्षिकग्राहकशुल्कम् - रू ३००/-

**SAMBASHANA SANDESHA**

AKSHARAM , IInd PHASE, 8TH CROSS ROAD,

GIRINAGAR, BANGLORE - 560085

PH - 080 26722576, 0944915974


शिवः - एवं वा ! किन्तु जनाः प्रान्तीयदिनपत्रिकामेव न पठन्ति । एषा संस्कृतपत्रिका खलु ! एतां के पठन्ति ?

पितामहः - वत्स ! सुधर्मा नाम संस्कृतदिनपत्रिका अस्ति । तां भारतदेशे कोणे कोणे सहस्रशः जनाः प्रतिदिनं पठन्ति। सन्देशपत्रिकां तु न केवलं भारते किन्तु विदेशेषु अपि संस्कृताभिमानिनः पठन्ति ।

शिवः - अहो तावन्तः जनाः पठन्ति वा ? तर्हि ते सर्वेऽपि संस्कृतपण्डिताः इति चिन्तयामि ।

पितामहः - नैव, नैव, सर्वेऽपि पण्डिताः न । संस्कृतपण्डिताः, सामान्यसंस्कृतज्ञाः, संस्कृतभाषां ज्ञातुं ये इच्छन्ति ते, उपाध्यायाः, व्यापारिणः, वैद्याः, छात्राः एवं विविधक्षेत्रेषु कार्यं कुर्वाणाः जनाः सम्भाषणसन्देशम् आनन्देन पठन्ति । यतः सन्देशे सरलसंस्कृतं भवति । प्रेरणात्मकाः विषयाः भवन्ति ।

SCERT TELANGANA

शिवः - छात्राः अपि पठन्ति वा ? सरलसंस्कृतं चेत् अहमपि अवगन्तुं शक्नोमि । पितामह ! वयमपि एतां पत्रिकां स्वीकुर्मः । अहं प्रतिदिनं पठामि । पाठशालां नीत्वा मित्राणि दर्शयामि ।

पितामहः - भद्र ! भवान् सम्यक् उक्तवान् । अहमपि बहुकालतः एतां पत्रिकां स्वीकर्तुमिच्छामि । अतः अद्य एव शुल्कं प्रेषयामः । सङ्केतं लिखतु ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. शिवः पितामहेन सह गच्छन् भित्तिपत्रं दृष्टवान् खलु ! तस्मिन् भित्तिपत्रे के के अंशाः सन्ति ?

२. पाठे भित्तिपत्रम् अधिकृत्य ज्ञातवन्तः खलु ! भवतां परिसरेषु कीदृशानि भित्तिपत्राणि दृष्टवन्तः ? तानि कान् अंशान् अधिकृत्य निर्मितानि सन्ति ?

३. भित्तिपत्राणां विषये भवन्तः किं जानन्ति ? भित्तिपत्राणि किमर्थं लेपयन्ति ?

४. संस्कृतभाषाविषये भवन्तः कान् विषयान् ज्ञातवन्तः ?

५. 'वयं यावतीः अधिकाः भाषाः जानीमः तावत् अधिकं ज्ञानं सम्पादयामः' इति विषये छात्राः गणद्वये उपविश्य चर्चां कुर्वन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठं पठित्वा पाठस्थेषु येषु पदेषु पञ्च अक्षराणि सन्ति, तानि अत्र लिखन्तु ।

| | |
|---|---|
| अ. .................. | ऊ. .................. |
| आ. .................. | ऋ. .................. |
| इ. .................. | ॠ .................. |
| ई. .................. | ए. .................. |
| उ. .................. | ऐ. .................. |

२. पाठे शिवः स्वपितामहं यान् प्रश्नान् पृष्टवान् तान् पठन्तु । तेषाम् अधः रेखाङ्कनं च कुर्वन्तु ।

SCERT TELANGANA

३. अधः दत्तं परिच्छेदं पठित्वा तस्याधारेण प्रश्नानां समाधानानि लिखन्तु ।

भारतदेशः विविधभाषाणां जन्मभूमिः । अस्माकं देशे सहस्राधिकानां भाषाणां भाषिणः सन्ति । अस्माकम् आन्ध्रराज्ये तेलुगु, उर्दू इत्यादि मातृभाषिभिः सह विविधभाषाणां सम्भाषिणः सन्ति । तेऽपि जानाः सन्ति येषां मातृभाषा संस्कृतम् । अपि च कोण्डा, कुयी, कोया, कोलामी, बञ्जारा, आदिवासि-ओरिया, सवरा इत्यादिगिरिजनभाषाः वदन्तः जनाः सन्ति । भाषा कापि वा भवतु, सम्भाषणे अस्ति चेदेव अभिवृद्धिं प्राप्नोति । व्यवहाररहिता भाषा अदृश्या भवति । प्रयोगे विद्यमाना भाषा तस्मिन् प्रान्ते विद्यमानानाम् अन्यभाषाणां पदानि स्वीकृत्य पुष्टा भवति ।

अ. परिच्छेदः कम् विषयम् अधिकृत्य वदति ?

आ. एतस्य परिच्छेदस्य शीर्षिकां लिखन्तु ।

इ. आन्ध्रप्रदेशे जनाः काः काः भाषाः वदन्ति ?

ई. भाषा कदा अभिवृद्धिं प्राप्नोति ?

उ. भाषया कः उपकारः भवति ?

५. पाठस्य आधारेण अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

अ. सम्भाषणसन्देशः कस्मात् नगरात् प्रकाश्यते ? तस्य लक्ष्यं किम् ?

आ. काभिः पत्रिकाभिः संस्कृतप्रचारः क्रियते ?

इ. सम्भाषणसन्देशं के के पठन्ति ?

ई. सम्भाषणसन्देशे के के विषयाः भवन्ति ?

## III. स्वीयरचना



१. भित्तिपत्राणि कतिविधानि भवन्ति ? तेभ्यः कानि प्रयोजनानि सन्ति ?

२. 'संस्कृतभाषां सुगमतया अधिगन्तुं शक्नुमः' - इति विषये भवतामभिप्रायः कः?

३. नूतनभाषायाः अधिगमनसमये काः समस्याः भवन्ति ? तासां परिष्कारं कथं कुर्मः ?

४. सम्भाषणसन्देशस्य विषये भवताम् अभिप्रायः कः ?

## IV. पदजालाभिवृद्धिः



१. मञ्जूषातः योग्यं पदं चित्वा रिक्तस्थानानि पूरयन्तु । स्वीयवाक्यानि लिखन्तु ।

सम्यक्, चेत्, केवलं, किन्तु, उद्दिश्य, कोणे

रामः विद्यानाथम् .................. एवं वदति मित्र ! भवान् .................. पठति चेत् देशस्य .................. अपि कार्यं कर्तुं शक्नोति । .................. पठनमात्रेण ज्ञानं पूर्णं न भवति । .................. अभ्याससहितं पठनं करोति ............. अवश्यं कार्यसिद्धिः भवति।

२. "सामान्यसंस्कृतज्ञाः" इत्यस्मिन् पदे स्थितानि अक्षराणि उपयुज्य नूतनपदानि लिखन्तु ।

३. सङ्ख्याः लिखन्तु ।

अ. पञ्चपञ्चाशत् - ...............

आ. एकचत्वारिंशत् - ...............

इ. षट्त्रिंशत् - ...............

ई. नवविंशतिः - ...............

४. अधः सङ्ख्याः सन्ति । ताः अक्षरैः लिखन्तु ।

१) ६४ - ......................... २) ७५ - .........................

३) ८८ - ......................... ४) ८२ - .........................

५) ९७ - .........................

SCERT TELANGANA

## V. सर्जनात्मकव्यक्तीकरणम्



१. वृक्षेभ्यः अस्माकं बहूनि प्रयोजनानि सन्ति । कालुष्यनिवारणाय वृक्षाः आधारभूताः । सर्वोऽपि छात्रः एकैकं वृक्षं रोपयित्वा तं संरक्षेत् । तस्य उत्तरदायित्वं छात्राः स्वीकुर्युः । एतं विषयं ग्रामस्थाः सर्वे यथा जानीयुः तथा एकं भित्तिपत्रं निर्मान्तु ।

## VI. प्रशंसा



संस्कृतभाषाप्रसारप्रचाराय संस्कृतभारती किं किं कार्यं करोति इति ज्ञात्वा कक्ष्यायां मित्रैस्सह चर्चां कुर्वन्तु ।

## VII. व्याकरणांशाः



१. श्लोकस्य पादं पठन्तु । रेखाङ्कितपदे अवगच्छन्तु ।

अनभ्यासे विषं विद्या - अजीर्णे भोजनं विषम् ।

अनभ्यासः - न अभ्यासः ।

अजीर्णम् - न जीर्णम् ।

मिलितयोः द्वयोः पदयोः अथवा अनेकपदानां मेलने **समासः** इति व्यवहारः । समासार्थावबोधकं वाक्यं **विग्रहवाक्यम्** इति व्यवहारः । उपरितनस्य समासस्य **"नञ् तत्पुरुषः"** इति व्यवहारः ।

२. अधः दत्तानां समासानां विग्रहवाक्यानि लिखन्तु ।

अ. असत्यम् -

आ. अधर्मः -

इ. अनावश्यकम् -

ई. अदृष्टम् -

उ. अतर्कितम् -

ऊ. अनन्तः -

SCERT TELANGANA

### ३. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।

अ. गणेशः = गण + ईशः ( अ + इ = ए )

अ. देशोन्नतिः = देश + उन्नतिः ( अ + उ = ओ )

इ. देवर्षिः = देव + ऋषिः ( अ + ऋ = अर् )

**उपरितनेषु उदाहरणेषु**

अकारस्य इकारे परे 'एकारः'

अकारस्य उकारे परे 'ओकारः'

अकारस्य ऋकारे परे 'अर्' आगताः ।

**एतानि गुणसन्धियुक्तानि पदानि ।**

| |
|---|
| अ,आ इत्येताभ्यां वर्णाभ्याम् इ,ई इत्येतयोः परयोः एकारः, उ, ऊ इत्येतयोः परयोः ओकारः, ऋ ॠ इत्येतयोः परयोः अर् च पूर्वपरयोः स्थाने एकादेशाः भवन्ति । |

अयं **गुणसन्धिः** इति उच्यते ।

### ४. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।

अ. देवेन्द्रः = ............ + ............

आ. रमेशः = ............ + ............

इ. यथोक्तम् = ............ + ............

ई. गुणोत्तमः = ............ + ............

उ. महर्षिः = ............ + ............

### ५. अधः दत्तानां पदानां योजनं कुर्वन्तु ।

अ. राजा + ऋषिः = ............................

आ. महा + उत्सवः = ............................

इ. सूर्य + उदयः = ............................

ई. परम + ईश्वरः = ............................

उ. उप + इन्द्रः = ............................



SCERT TELANGANA



## परियोजनाकार्यम्

"अस्माकं पाठशालायां दशदिनसंस्कृतसम्भाषणशिबिरं चालयन्तु" इति प्रार्थयन्तः संस्कृतभारत्यै एकं लेखं लिखन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. पाठाधारेण भित्तिपत्रे स्थितान् अंशान् वक्तुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं, पाठे स्थितानि षडक्षरपदानि ज्ञात्वा लेखितुं च शक्नोमि । | आम् / न |
| ३. सम्भाषणसन्देशस्य लक्ष्याणां विवरणं कर्तुं शक्नोमि । | आम् / न |
| ४. भित्तिपत्रस्य निर्माणं स्वयं कर्तुं शक्नोमि । | आम् / न |

**कृषितो नास्ति दुर्भिक्षम् ।**

SCERT TELANGANA

तृतीयः भागः

# चटक ! चटक !

पठन्तु, नन्दन्तु

चटक ! चटक ! रे चटक !
चिव् चिव् कूजसि त्वं विहग !
॥ चटक ! चटक ॥

नीडे निवससि सुखेन डयसे
खादसि फलानि मधुराणि
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता
॥ चटक ! चटक ॥

मातापितराविह मम न स्तः
एकाकी खलु खिन्नोऽहम्
एहि समीपं चिव् चिव् मित्र !
ददामि तुभ्यं बहु धान्यम्
॥ चटक ! चटक ॥

चणकं स्वीकुरु पिब रे नीरं
त्वं पुनरपि रट चिव् चिव् चिव्
तोषय मां कुरु मधुरालापं
पाठय मामपि तव भाषाम्
॥ चटक ! चटक ॥

डा. विश्वासः



SCERT TELANGANA

# ६. किं न्याय्यम् ?

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ? ते किं कुर्वन्ति ?

२. चित्रे विद्यमाना महिला किं कथयति ?

३. आभरणानि कः अपहृतवान् ?

SCERT TELANGANA

**उद्देश्यम्** - मानवजीवनमूल्यानां ज्ञापनम् । विविधसन्दर्भेषु नूतनानुभूतीनां परिचयः । नैतिकमूल्यानां शिक्षणम् ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



पुरा जयन्तीपुरस्य राज्ञः सोमसिंहस्य समीपे एकः विशिष्टः कपोतः आसीत् । तस्य नाम शान्तः । सः राज्ञः अतीव प्रियतमः, चतुरः सम्भाषणशीलश्च आसीत्। शान्तः अन्तःपुरे स्वेच्छया विहरति स्म । एकदा प्रातः अन्तःपुरात् बहिरागतस्य तस्य कर्णे पतितं यत् 'अरण्ये एकः अमृतवृक्षः अस्तीति, तत् फलं खादन्ति चेत् नित्ययौवनाः अजरामराश्च भवेयुः' इति । तच्छ्रुत्वा सः कपोतः यथा कथञ्चित् तत्र गत्वा तत् फलमानीय राज्ञे दास्यामीति निश्चयमकरोत् । परस्मिन् दिने सः कपोतः अत्यन्तसाहसेन अटवीं गत्वा तं पादपं दृष्ट्वा फलं छित्त्वा पुनः आगच्छन् आसीत् । तस्मिन् समये मार्गमध्ये सूर्यः अस्तं गतः । सर्वत्र अन्धकारः व्याप्तः ।

रात्रौ प्रतिगमनं कष्टमिति मत्वा कपोतः एकस्मिन् वृक्षे विश्रान्तिं स्वीकर्तुं निश्चित्य तस्य तरोः कोटरे अमृतफलं स्थापितवान् । तस्मिन् कोटरे एकः सर्पः निवसति स्म ।

आहारार्थं गतः स भुजङ्गः पुनरागत्य तत् फलं दृष्टवान् । खादितुमारभ्य अरुचिः इति मत्वा परित्यक्तवान् । एवं तत् फलं विषपूरितम् अभवत् । एतत् अजानन् कपोतः प्रातः तत् फलं स्वीकृत्य राजमन्दिरम् आगतवान् । फलं राज्ञे दत्त्वा तस्य विशेषताम् उक्तवान् च ।



SCERT TELANGANA



फलं खादितुम् उद्युक्तः राजा प्रधानमन्त्रिणा निवारितः । 'प्रथमतः तस्य फलस्य भागः यस्मै कस्मैचित् निवेद्य ततः भवान् स्वीकरोतु' इति मन्त्रिणा उक्तम् ।

तदा राजा कश्चित् फलभागं काकाय दत्तवान् । काकः तत् शकलं खादित्वा सपदि मृतः । मन्त्री उक्तवान् 'हे राजन् ! भवान् दुर्दैवात् मुक्तः । एतत् फलं दत्त्वा भवन्तं हन्तुमुद्युक्तः कपोतः' इति । राजा क्रोधेन "एनं कपोतं कानने त्यजन्तु । विषफलं च अरण्ये भूमौ स्थापयन्तु" इति भटान् आदिष्टवान् । तत् श्रुत्वा कपोतः अतीव दुःखितः । ते कपोतम् अटव्यां व्यसृजन् । भटाः फलं भूमौ स्थापितवन्तः ।

आश्चर्यकरोऽयं विषयः यत् सद्यः तत्रैकः महान् वृक्षः जातः । सः वृक्षः अद्भुतफलैः विराजमानश्च आसीत् । भटाः एतत् विचित्रं विषयं राजानमुक्तवन्तः । तत् श्रुत्वा राजा एवमादिष्टवान् - "यः कोऽपि तत्र न गच्छेत् । तत् फलं च न खादेत् । यतः सः विषवृक्षः" इति ।

तस्य वृक्षस्य समीपप्रदेशे वृद्धदम्पती अवसताम् । तौ दीनौ असहायौ च, भिक्षाटनं कर्तुमपि असमर्थौ । तौ स्वजीवनसमाप्त्यर्थं तत् फलं खादितुं निश्चितवन्तौ ।

SCERT TELANGANA



रात्रौ स वृद्धः वृक्षस्य समीपं गत्वा फलद्वयं छित्त्वा गृहमानीतवान् । जायापती फले खादितवन्तौ, प्रभाते उत्थितवन्तौ स्वस्थौ तरुणौ आत्मानौ



दृष्ट्वा विस्मितौ अभवताम् । एनं विषयं महाराजः ज्ञातवान् । राजा तत्र गत्वा तौ वृद्धौ दृष्ट्वा विस्मितः अभवत् ।



राजा सोमसिंहः कपोतेन आनीतं फलम् अमृतफलमेव इति ज्ञात्वा 'अहं निष्कारणेन तं दण्डितवान्' इति नितरां दुःखितः अभवत् । 'पूर्वापरम् अनालोच्य यत्किमपि क्रियते तत् अनर्थदायकं भवति । इतः परं सम्यक् विचिन्त्यैव दण्डनं करोमि' इति स निश्चितवान् ।

## एतानि कुर्वन्तु

### I. श्रृण्वन्तु, विचिन्त्य वदन्तु



१. पाठ्यांशचित्राणि पश्यन्तु, चित्रे के के सन्ति ? ते किं कुर्वन्ति ?
२. राजा यदा दण्डनं कृतवान् तदा निर्दोषी शान्तः किमर्थं मौनेन स्थितवान् ?
३. राज्ञः कपोते प्रीतिः खलु ! भवतः प्रीतिपात्रं पक्षी कः ? किमर्थम् ?
४. भवद्भिः दृष्टस्य विवादस्य परिष्कारं वदन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठस्थानि विशिष्टानि पदानि अन्विष्य लिखन्तु ।

उदा - अमृतफलम्, सम्भाषणशीलः

२. अधः दत्तानि वाक्यानि पठन्तु । पाठस्य आधारेण दोषान् निवार्य शुद्धवाक्यानि कुर्वन्तु ।

अ. न्यायान्यायविचारणम् अकृत्वा दण्डनं दातव्यम् ।

..........................................

आ. रात्रौ कपोतः अमृतफलं सुरक्षितं भवतीति मत्वा स्वसविधे स्थापितवान् ।

..........................................

इ. फलभक्षणेन हानिः नास्ति इति मन्त्रिणा उक्तम् ।

..........................................

ई. नित्ययौवनौ भवितुं वृद्धदम्पतिभ्याम् अमृतफलं खादितम् ।

..........................................

उ. राजा शान्तः कपोतः निष्कारणं दण्डितः इति ज्ञात्वा नितरां दुःखितः अभवत् ।

..........................................

३. अधः दत्तं परिच्छेदं पठन्तु, तथा दत्तानां विकल्पप्रश्नानां समाधानानि लिखन्तु।

बहोः कालात् पूर्वं विष्णुपुरम् इत्याख्यं राज्यं प्रतापसेनः पालयति स्म । प्रतापसेनस्य त्रयः पुत्राः । तेषां नामानि जयधीरः काशीनाथः धीमान् च ।

SCERT TELANGANA

एतान् त्रीन् पुत्रान् पिता गुरुकुलं प्रेषितवान् । विद्याभ्यासं कृतवतः स्वपुत्रान् राजा एकस्मिन् विरामदिने राजकार्यपरिशीलनार्थम् आस्थानं प्रति अनयत् । तस्मिन् समये राज्ञः पुरतः कश्चन विवादः जातः । सः विवादः परिष्करणीयः इति त्रीन् पुत्रान् आज्ञापयत् ।

अ. पुरा राजपुत्राः कुत्र पठन्ति स्म ? ( )

अ. पाठशालायाम्  आ. गुरुकुले  इ. गृहे

आ. विष्णुपुरं कः परिपालयति स्म ? ( )

अ. जयधीरः  आ. धीमान्  इ. प्रतापसेनः

इ. राजा स्वपुत्रान् राजकार्यपरिशीलनार्थं कुत्र अनयत् ? ( )

अ. आस्थानम्  आ. अन्तःपुरम्  इ. मन्दिरम्

ई. विवादः परिष्करणीयः इति राजा कान् आज्ञापयत् ? ( )

अ. भटान्  आ. मन्त्रीन्  इ. पुत्रान्

४. **पाठ्यांशस्य आधारेण अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु।**

अ. शान्तः कुत्र गतवान् ? किं कृतवान् ?

आ. राजा शान्तं दण्डितवान् । किं तत् युक्तम् ? किमर्थम् ?

इ. अमृतफलं विषफलत्वेन कथं परिणतम् ?

ई. मन्त्री शान्तम् उद्दिश्य राजानं किमुक्तवान् ?

उ. वृद्धदम्पती किमर्थं मर्तुं चिन्तितवन्तौ ?

## III. स्वीयरचना



**१. राजा शान्तं किमर्थं दण्डितवान् ?**

**२. सर्पेण अमृतफलभक्षणं न क्रियते चेत् किं भवति स्म ?**

**३. शान्तं दण्डितवानिति राजा दुःखितः । किमर्थम् ?**

**४. वृद्धदम्पती किमर्थं तत् फलं खादितुम् उद्युक्तौ । तयोः समस्याः काः? तासां परिष्कारः कथं करणीयः ?**

SCERT TELANGANA

## IV. पदजालाभिवृद्धिः



१. अधः दत्तानि एकवचनपदानि बहुवचने परिवर्त्य स्वीयवाक्यानि लिखन्तु ।

अ. नदी - ........................................

आ. निर्णयः - ........................................

इ. निवासः - ........................................

ई. जन्तुः - ........................................

उ. मार्गः - ........................................

२. उदाहरणानुसारं दत्तानां पदानाम् आद्यक्षरमुपयुज्य अन्यपदानि लिखन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| उदा - | शान्तः | - | शकटम् | शरत् | शारदा |
| अ. | सर्पः | - | ............. | ............. | ............. |
| आ. | विषम् | - | ............. | ............. | ............. |
| इ. | राजा | - | ............. | ............. | ............. |
| ई. | सम्यक् | - | ............. | ............. | ............. |
| उ. | मन्त्री | - | ............. | ............. | ............. |
| ऊ. | कपोतः | - | ............. | ............. | ............. |
| ऋ. | सह | - | ............. | ............. | ............. |
| ॠ. | फलम् | - | ............. | ............. | ............. |

३. अधः दत्तानि वाक्यानि पठित्वा तस्य भावम् एकेन वाक्येन लिखन्तु ।

अ. कुटुम्बसमेतस्य राज्ञः निवासप्रदेशः ......................।

आ. न्याय्यं किम् अन्याय्यं किमिति वक्तुं सामर्थ्यम् ......................।

इ. अन्येषां दयाम् आश्रित्य स्थिताः जनाः ......................।

SCERT TELANGANA

४. भवतः इष्टफलानां नामानि लिखित्वा तेषां वर्णं रुचिं च लिखतु ।

| फलस्य नाम | फलस्य वर्णः | फलस्य रुचिः |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |

## V. सर्जनात्मकव्यक्तीकरणम्



१. राजमन्दिरे प्रचलितं सन्दर्भं नाटकरूपेण प्रदर्शयन्तु ।

२. फलं खादितुम् उद्युक्तं राजानं मन्त्री यदि न निवारयेत् कथा कथं भवति स्म ? तस्य सन्दर्भस्य परिवर्तनं कृत्वा लिखन्तु ।

## VI. प्रशंसा



१. पौर्वापर्यम् अविचार्य राजा कपोतं दण्डितवान् खलु ! भवतः मित्रेण कोऽपि दोषः क्रियते चेत् भवतः प्रतिस्पन्दनं कथं भवति ?

SCERT TELANGANA

## VII. व्याकरणांशाः



१. **अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।**

अ. छात्रः श्वः पाठशालां <u>गमिष्यति</u> ।

आ. अद्यतनबालाः श्वस्तनपौराः <u>भविष्यन्ति</u> ।

इ. वृक्षकः वृक्षः भूत्वा फलानि <u>दास्यति</u> ।

उपरितनवाक्येषु रेखाङ्कितानि पदानि भविष्यत्क्रियां सूचयन्ति । एतादृशक्रियापदानां **'लृट्'** इति व्यवहारः।

२. **अधः दत्तानि पदानि उपयुज्य वाक्यनिर्माणं कुर्वन्तु ।**

| | | |
|---|---|---|
| अ. भविष्यामः | आ. करिष्यन्ति | इ. द्रक्ष्यामः |
| ई. वदिष्यामि | उ. खादिष्यामः | ऊ. लेखिष्यन्ति |

३. **अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।**

| | | |
|---|---|---|
| तत्रैव | = तत्र + एव | ( अ + ए = ऐ ) |
| तवैश्वर्यम् | = तव + ऐश्वर्यम् | ( अ + ऐ = ऐ ) |
| गङ्गौघः | = गङ्गा + ओघः | ( आ + ओ = औ ) |
| ममौषधम् | = मम + औषधम् | ( अ + औ = औ ) |

उपरितनेषु उदाहरणेषु अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः **'ऐकारः'**, ओ, औ इत्येतयोः परयोः **'औकारः'** आगतः ।

**एतानि वृद्धिसन्धियुक्तानि पदानि ।**

> अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः **ऐकारः**
>
> ओ, औ इत्येतयोः परयोः **औकारः** च पूर्वपरयोः स्थाने एकादेशो भवति ।

अयं **वृद्धिसन्धिः** इति उच्यते ।

SCERT TELANGANA

### ४. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।

अ. एकैकम् = .............. + ......................

आ. महैश्वर्यम् = .............. + ......................

इ. दिव्यौषधम् = .............. + ......................

ई. देशौन्नत्यम् = .............. + ......................

उ. वसुधैव = .............. + ......................

### ५. अधः दत्तानां पदानां योजनं कुर्वन्तु ।

अ. अष्ट + ऐश्वर्याणि = ........................

आ. जन + ऐक्यम् = ........................

इ. परम + ओषधिः = ........................

ई. वाक्य + ओघः = ........................

उ. महा + औदार्यम् = ........................



### परियोजनाकार्यम्

पक्षिणां चित्राणि सङ्गृह्य पटे लेपयन्तु । तेषां नामानि विवरणं च विलिख्य प्रदर्शयन्तु ।



### स्वीयमूल्याङ्कनम्



१. पाठ्यांशचित्रस्य आधारेण कथां स्वीयवाक्यैः वक्तुं शक्नोमि । आम् / न

२. पाठं पठित्वा वाक्यानि सम्यक्तया लेखितुं शक्नोमि । आम् / न

३. राजमन्दिरे सङ्घटितं विषयं नाटकरूपेण लेखितुं शक्नोमि । आम् / न

**सत्येन रक्ष्यते धर्मः ।**

SCERT TELANGANA

**चतुर्थः भागः**

# ७. स्फूर्तिः

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ?
२. ते किं कुर्वन्ति ?
३. चित्रं दृष्ट्वा भवान् किं ज्ञातवान् ?

**उद्देश्यम् - क्रीडासु स्फूर्तिप्रदर्शनम् । लक्ष्यसिद्धेः प्रयत्नकरण-प्रोत्साहनसामर्थ्यसम्पादनम् ।**

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।
२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।
३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।

SCERT TELANGANA

(क्रीडाशिक्षकं प्रति शिष्यस्य लेखः ।)



भाग्यनगरम् ,
दिनाङ्कः १३-०२-२०१३.

श्रीमते क्रीडाशिक्षकाय नमः ।

भवतः पूर्वविद्यार्थी ऋत्विक् नामाहं लिखामि । अहम् अत्र कुशली। भवान् कुशली इति मन्ये । भवतः मार्गदर्शने चतुरङ्गक्रीडायां प्रथमपुरस्कारं लब्धवान् । एतं विषयं भवान् स्मरत्येव इति मन्ये ।

अस्यां चतुरङ्गक्रीडायां मया प्राप्तान् अनुभवान् भवतः सविधे विनिवेदयामि ।

पाठशालास्तरे अस्यां क्रीडायां भागं गृहीतवतां मम प्रत्यर्थित्वेन स्थितानां विद्यार्थिनां व्यूहप्रतिव्यूहान् एकमेकमिति पर्यायेण निर्जित्य, अन्ततः सर्वान् निर्जित्य अहं प्रथमस्थाने स्थितः । भवद्भिः दत्तेन प्रोत्साहनेन सह मम पितरावपि मह्यं प्रोत्साहं दत्तवन्तौ । पूर्वं नगर-मण्डलस्तरे चतुरङ्गस्पर्धासु भागं गृहीतवान् । तत्र तीव्रा स्पर्धा आसीत् । तस्मिन् समये प्रपञ्चस्तरस्पर्धासु प्रविष्टयोः रष्याक्रीडाकारयोः कास्परोव्, कार्पोव् इत्येतयोः मध्ये प्रवृत्तां स्पर्धामहम् परिशीलितवानस्मि ।



चतुरङ्गक्रीडायाम् अस्माकं देशस्य विश्वनाथन् आनन्दः, कोनेरु हम्पी इत्यादयः क्रीडाकाराः नितरां प्रसिद्धिं गताः । अहम् अनेकपर्यायेषु कृष्णक्रीडनकैः एव क्रीडितवान् अस्मि । श्वेतक्रीडनकैः क्रीडनं केषुचित् सन्दर्भेषु एव अहं विश्वनाथन् आनन्दस्य शैल्या क्रीडितवान् । गतराज्यस्तरस्पर्धायाम् अहं व्यूहप्रतिव्यूहौ कुर्वन्, सर्वान् पराजितान् कुर्वन्, चरमाङ्कपर्यन्तं आगतवान् । अकस्मात् तस्मिन् अन्तिमे पर्याये





माधवनामकेन प्रत्यर्थिना सह क्रीडित्वा पराजितः भूत्वा द्वितीयस्थानं प्राप्तवान् । सः मदपेक्षया चतुरङ्गक्रीडने सुमहत् प्रावीण्यं प्रदर्शितवान् ।



अहं तदा कृष्णक्रीडनकैः क्रीडितवान् । मम प्रत्यर्थी श्वेतक्रीडनकैः अक्रीडत् । क्रीडा अत्यन्तम् उत्कण्ठतया प्राचलत् ।दुर्भेद्ये दुर्गे इव मम राजा प्रत्यर्थिसैनिकानां मध्ये आसीत् । मम प्रत्यर्थी स्वस्य मन्त्रिणं, शकटं (उष्ट्रं), गजं, भटौ एकम् अश्वं च राज्ञः सहायत्वेन स्थापितवान् । मम प्रत्यर्थी तस्य सैनिकान् मम निकटे अग्रे चालयन् मम बह्वीः समस्याः कल्पितवान् । अहं मम शकट-हय-गजानां साहाय्येन मम सैनिकान् अग्रे चालयन् प्रतिव्यूहं कृतवान् । तदा मम राज्ञः समीपे स्थितान् कतिपयान् सैनिकान् अहं परित्यक्तवान् ।

तस्य प्रतीकाराय प्रत्यर्थिनः शकटम्(उष्ट्रम्) एकं सैनिकं पराजितवान् । प्रत्यर्थिनः मन्त्री, मम राजनि बहुधा आक्रमणम् अकरोत् । तत्समये आवयोः द्वौ मन्त्रिणौ निर्गतौ ।

प्रत्यर्थी मम सैनिकान् पराजित्य, मां बलहीनम् अकरोत् । तथापि अहं महता धैर्येण, युक्त्या च मम गजम्, अश्वं चाग्रे चालयन् प्रत्यर्थिनः राज्ञः उपरि बहुधा अभियुज्य, तं बलहीनं कृतवान् । किन्तु तस्मिन् सन्दर्भे मम गजं नष्टवान् । ततः अहमत्यन्तं बलहीनतां गतः । मम प्रत्यर्थी मम राजानम् आक्रम्य तं निरुद्धवान् । अतः मम पराजयो जातः । अपि चाहं तस्य विकटपटुत्वं समयस्फूर्तिं च बहुधा प्रशंसितवान् । भविष्यन्तीषु स्पर्धासु अहं यथा प्रथमे स्थाने स्थातुं अर्हः स्यां तथा भवान् मह्यं पटुतरशिक्षणं कृपया प्रयच्छतु ।

इत्थं,
भवदीयः प्रियशिष्यः,
ऋत्विक् ।

**सङ्केतः**
सि.हेच्. साम्बशिवरावः,
गृहसङ्ख्या २३-२३-३०,
श्रीनिवासराव् पेट,
तृतीयमार्गः,
गुण्टूरु ।





SCERT TELANGANA

**शिष्यं प्रति क्रीडाशिक्षकस्य समाधानलेखः ।**



गुण्टूरु (गर्तपुरी),
दिनाङ्कः - २१-०२-२०१३.

आयुष्मते ऋत्विजे मम शुभाशिषः ।

तव लेखं दृष्टवानस्मि । युष्माकं गृहे सर्वे कुशलिनः वा ? इतः पूर्वं त्वया लिखितानां लेखानाम् अपेक्षया अयं लेखः अत्यन्तम् आसक्तिजनकः अस्ति । चतुरङ्गक्रीडने त्वया अनुभूतान् क्लेशान् तव लेखेन विज्ञातवानस्मि । त्वं केन प्रकारेण प्रत्यर्थिनम् अभियुक्तवान् असि, तत्सर्वं मह्यं निवेदितवान् । तत् मम गर्वकारणम् । प्रत्यर्थिनः आक्रमणसमयस्फूर्तिः, व्यूहप्रतिव्यूहकल्पना, राजादीनां चालनप्रयोगादयः अंशाः त्वया सम्यक् एव ज्ञाताः । भवतः इतोऽधिकं शिक्षणम् आवश्यकमिति मन्ये । अहं त्वया अभिलषितेन विधानेन प्रत्यर्थिनां नियन्त्रणे उपयोज्याः जागरूकताः शिक्षयिष्यामि, आगामिराष्ट्रचतुरङ्गस्पर्धासु त्वां प्रथमस्थानं प्रापयितुं च यतिष्ये ।

इत्थं,
भवतः उपाध्यायः,
साम्बशिवरावः ।

**सङ्केतः**
ऋत्विक्,
गृह सङ्ख्या १८-११५,
कमलानगर्, चैतन्यपुरी,
भाग्यनगरम् ।

SCERT TELANGANA

# एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. भवन्तः कदापि लेखं लिखितवन्तः वा ? कान् प्रति लिखितवन्तः? किमर्थम् ?

२. लेखान् केषु सन्दर्भेषु लिखन्ति ?

३. प्राचीनकाले समाचारं कथं प्रेषयन्ति स्म ?

४. लेखाः वार्ताप्रेषणे कथमुपकुर्वन्ति ?

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठे स्थितानां ग्रामाणां, मानवानां च नामानि पट्टिकारूपेण लिखन्तु ।

२. अधः दत्तानि वाक्यानि मातृभाषया अनुवदन्तु ।

अ. गृहे सर्वे कुशलिनः वा ?

आ. भवते मम अभिनन्दनानि ।

इ. भवतः इतोऽपि अधिकशिक्षणम् आवश्यकमिति अहं चिन्तयामि ।

ई. आगामिचतुरङ्गक्रीडायां सर्वान् जेतुम् उत्तमशिक्षणं दास्यामि ।

३. अधः दत्तं परिच्छेदं पठन्तु । तदाधारेण दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

सुवर्णगिरिपालकस्य रत्नपालकस्य चतुरङ्गक्रीडने आसक्तिः आसीत् । समये लब्धे सति सः आस्थानप्रमुखैः सह क्रीडति स्म । सः केन सह वा क्रीडतु नाम विजयस्तु तस्यैव भवति स्म । सः विजयः तं बहु नन्दयति स्म ।

अ. उपरितनपरिच्छेदः कम् अंशं बोधयति ? परिच्छेदस्य शीर्षिकां रचयन्तु ।

........................................................ ।

आ. सुवर्णगिरिं कः पालयति स्म ?

........................................................ ।

इ. रत्नपालाय का क्रीडा रोचते ?

........................................................ ।

SCERT TELANGANA

ई. रत्नपालः प्रतिदिनं किं करोति स्म ?

............................................................. ।

उ. रत्नपालं कः नन्दयति स्म ?

............................................................. ।

**३. पाठमाधारीकृत्य अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

अ. ऋत्विक् स्वस्य उपाध्यायं प्रति कदा, कुत्र लेखं लिखितवान् ?

आ. ऋत्विक् कस्यां क्रीडास्पर्धायां भागं गृहीतवान् ?

इ. ऋत्विक् चतुरङ्गक्रीडायां कस्य प्रोत्साहं प्राप्तवान् ?

ई. ऋत्विक् केन सह स्पर्धां कृतवान् ?

उ. चतुरङ्गक्रीडायां भारतीयप्रसिद्धक्रीडाकाराः के ?

ऊ. ऋत्विक् उपाध्यायं किमिति प्रार्थितवान् ?

ऋ. उपाध्यायः ऋत्विजे किमिति लेखं लिखितवान् ?

## III. स्वीयरचना



**१. व्यायामोपाध्यायाः आगस्ट् १५, जनवरि २६ इत्यादिषु राष्ट्रियपर्वदिनेषु क्रीडाः क्रीडितुं शिक्षणं कथं यच्छन्ति ?**

**२. चतुरङ्गक्रीडाम् अधिकृत्य ज्ञातवन्तः खलु ! खो-खो क्रीडाविषये दशवाक्यानि लिखन्तु ।**

**३. क्रीडायां स्फूर्तिः नाम का ?**

**४. क्रीडायां विजेतारः पराजितेन सह कथं व्यवहरेयुः ?**

**५. विविधजनानुद्दिश्य लेखलेखनसमये तेषां सम्बोधनं कथं भवेत् ?**

## IV. पदजालाभिवृद्धिः



**१. अधः दत्तानां रेखाङ्कितानां पदानां विरुद्धार्थकपदानि लिखन्तु ।**

अ. जनपदस्तरे प्रथमपुरस्कारं स्वीकृत्य आनन्दं प्राप्तवान् । राष्ट्रस्तरे पुरस्कारं अप्राप्यापि ............ न प्राप्तवान् ।

आ. चतुरङ्गे जित्वा सन्तोषं प्राप्तवान् । धावनक्रीडायां..........बाधां नानुभूतवान् ।

इ. महान्तः देशभक्ताः देशगौरवं वर्धितवन्तः । मूर्खाः देशप्रतिष्ठां .............. ।

ई. फल्गुनस्य कबड्डी क्रीडायां प्रावीण्यमस्ति । किन्तु क्रिकेट् क्रीडायां ............. ।

उ. प्रज्ञा सम्यक् पठित्वा उत्तीर्णा अभवत् । शीला सम्यक् अपठित्वा ............. अभवत् ।

२. अधः दत्तेषु पदेषु सम्बन्धरहितपदं कोष्ठकेषु लिखन्तु ।

अ. समपत्रम्-सङ्गणकम्-पिहितपत्रम्-अन्तर्देशीयपत्रम् । (     )

आ. कन्दुकम्-क्रीडनकम्-पुस्तकम्-ब्याट् । (     )

इ. उष्ट्रः-गजः-मेषः-अश्वः । (     )

ई. पाठशाला-विद्यालयः-वित्तकोशः-कलाशाला । (     )

३. रेखाङ्कितपदानाम् अर्थम्, लेखे तस्य पदस्य स्थानं च अवगच्छन्तु ।

प्रदेशः - विजयवाटिका,
दिनाङ्कः - २५-०७-२०१२.

सम्बोधनम् - प्रियमित्र !

लेखनीयः विषयः
जन्मदिनशुभाशयाः

समाप्तिसूचकम्
इति
भवतः मित्रम्

सङ्केतः

SCERT TELANGANA

**४. मञ्जूषायां विद्यमानानि पदानि उपयुज्य अनुजाय पत्रं लिखन्तु ।**

| |
|---|
| कुशलम्, अम्बायाः कृते, जनकस्य कृते,<br>पाठशालायाः , विरामः, सम्यक्, मम |

**५. अधः दत्तानि पदानि पठन्तु, पदयोः मध्ये सम्बन्धम् अवगच्छन्तु ।**

अ. उत्तमः बालकः ।

आ. उत्तमा बालिका ।

इ. उत्तमं पुस्तकम् ।

ई. विशालं क्रीडाङ्गणम् ।

उ. सुदीर्घः मार्गः ।

ऊ. पीतवर्णा शाटिका

उपरितनपदेषु पूर्वपदानि **विशेषणपदानि** उत्तरपदानि **विशेष्यपदानि** । विशेषणपदं विशेष्यपदस्य लिङ्गं, वचनं विभक्तिं च अनुसरति ।

**६. उपरि दत्तानाम् उदाहरणानाम् अनुसारं मञ्जूषातः विशेषणपदानि विशेष्यपदानि चित्वा वाक्यं रचयन्तु ।**

| | |
|---|---|
| नीला, श्वेतं, सुन्दरः,<br>उन्नतं, विनीलः, मधुरा,<br>विनीतः, | पुष्पम्, भवनम्, आकाशः,<br>समाजः, वेणी, भाषा,<br>विद्यालयः |

अ. ................................

आ. ................................

इ. ................................

ई. ................................

उ. ................................

ऊ. ................................

ऋ. ................................

SCERT TELANGANA

## V. सर्जनात्मकव्यक्तीकरणम्



१. चतुरङ्गक्रीडायां भवतः आसक्तिः अस्ति । क्रीडाभ्यासं कर्तुमिच्छति । तदर्थं चतुरङ्गक्रीडाशिक्षकं प्रार्थयन् लेखं लिखतु ।

२. अधः दत्तं परिच्छेदं संस्कृतेन अनुवदन्तु।

ఆటలు మనల్ని ఎంతో ప్రభావితం చేస్తాయి, ఆటలద్వారా శారీరికాభివృద్ధితో పాటు మానసికానందం కూడా కలుగుతుంది. గెలిచినప్పుడు పొంగిపోవడం, ఓడినపుడు కృంగిపోవడమనేది జరుగనపుడే ఆటల్లోని నిజమైన ఆనందం మనకు కలుగుతుంది.

## VI. प्रशंसा



१. ऋत्विक् चतुरङ्गक्रीडायां माधवेन पराजितः । स्वयं पराजितोऽपि सः माधवं कथम् अभिनन्दितवानिति लिखन्तु ।

२. भवतां पाठशालापक्षतः केचन क्रीडास्पर्धासु भागं गृहीत्वा प्रथमपुरस्कारं प्राप्तवन्तः । भवान् तान् प्रशंसन् शुभाशयपत्रं रचयतु ।

## VII. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठित्वा रेखाङ्कितपदानि अवगच्छन्तु ।

**गणेशः <u>पार्वतीपरमेश्वरौ</u> नमति ।**

**अहं मम <u>मातापितरौ</u> नमामि ।**

**पुरुषार्थाः चतुर्विधाः । ते च <u>धर्मार्थकाममोक्षाः</u> ।**

पार्वतीपरमेश्वरौ - पार्वती च परमेश्वरः च ।

मातापितरौ - माता च पिता च ।

धर्मार्थकाममोक्षाः - धर्मः च अर्थः च कामः च मोक्षः च ।

उपरि दत्तानि **द्वन्द्वसमासस्य** उदाहरणानि ।

SCERT TELANGANA

२. अधः दत्तानां समासानां विग्रहवाक्यानि लिखन्तु ।

अ. पौत्रपितामहौ

आ. गुरुशिष्यौ

इ. शाकपाकौ

ई. सीतारामौ

उ. सुखदुःखे

ऊ. रामलक्ष्मणभरतशत्रुघ्नाः

३. अधः दत्तानां पदानां योजनं कुर्वन्तु सन्धिनामानि च लिखन्तु ।

अ. वस्त्र + आपणम् = ................ ................

आ. सर्व + ईश्वरः = ................ ................

इ. देव + ऐश्वर्यम् = ................ ................

ई. परम + औदार्यम् = ................ ................

उ. परम + ईश्वरः = ................ ................

ऊ. साधु + उक्तिः = ................ ................

४. अधः दत्तानां पदानां विभजनं कुर्वन्तु । सन्धिनामानि च लिखन्तु ।

अ. प्रेषयतीति = ..........+ ........... .....................

आ. उन्नतासनम् = ........ + ............ .....................

इ. हितोपदेशः = ........ + ............ .....................

ई. अमृतौदनम् = ......... + ............ .....................

उ. परोपकारः = ..........+ ........... .....................

ऊ. राष्ट्रैक्यम् = ......... + ............ .....................

SCERT TELANGANA



## परियोजनाकार्यम्

आकाशवाण्या, दूरदर्शनेन वा वार्ताः श्रुण्वन्तु । तासु क्रीडासम्बद्धाः वार्ताः एकत्र विलिख्य कक्षायां श्रावयन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. वार्तानां सम्प्रेषणे लेखाः कथम् उपयुज्यन्ते इति वक्तुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं पाठस्थक्रियापदानि अभिज्ञातुं च शक्नोमि । | आम् / न |
| ३. विविधलेखाः कथं लेखनीयाः इति जानामि । | आम् / न |
| ४. चतुरङ्गक्रीडामुद्दिश्य शिक्षकाय लेखं लेखितुं शक्नोमि । | आम् / न |

**असाधुं साधुना जयेत् ।**



SCERT TELANGANA

# शब्दरूपाणि

## १. इकारान्तः स्त्रीलिङ्गः ‘मति’ शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मतिः | मती | मतयः | प्रथमा विभक्तिः |
| हे मते | हे मती | हे मतयः | सम्बोधनप्रथमा विभक्तिः |
| मतिम् | मती | मतीः | द्वितीया विभक्तिः |
| मत्या | मतिभ्याम् | मतिभिः | तृतीया विभक्तिः |
| मत्यै, मतये | मतिभ्याम् | मतिभ्यः | चतुर्थी विभक्तिः |
| मत्याः, मतेः | मतिभ्याम् | मतिभ्यः | पञ्चमी विभक्तिः |
| मत्याः, मतेः | मत्योः | मतीनाम् | षष्ठी विभक्तिः |
| मत्याम्, मतौ | मत्योः | मतिषु | सप्तमी विभक्तिः |

एवं स्तुतिः, कीर्तिः, नीतिः इत्यादयः ।

## २. ऋकारान्तः पुंलिङ्गः ‘पितृ’ शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| पिता | पितरौ | पितरः | प्रथमा विभक्तिः |
| हे पितः | हे पितरौ | हे पितरः | सम्बोधनप्रथमा विभक्तिः |
| पितरम् | पितरौ | पितॄन् | द्वितीया विभक्तिः |
| पित्रा | पितृभ्याम् | पितृभिः | तृतीया विभक्तिः |
| पित्रे | पितृभ्याम् | पितृभ्यः | चतुर्थी विभक्तिः |
| पितुः | पितृभ्याम् | पितृभ्यः | पञ्चमी विभक्तिः |
| पितुः | पित्रोः | पितॄणाम् | षष्ठी विभक्तिः |
| पितरि | पित्रोः | पितृषु | सप्तमी विभक्तिः |

एवं भ्रातृ, जामातृ इत्यादयः ।

SCERT TELANGANA

## ३. ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| माता | मातरौ | मातरः | प्रथमा विभक्तिः |
| हे मातः | हे मातरौ | हे मातरः | सम्बोधनप्रथमा विभक्तिः |
| मातरम् | मातरौ | मातॄः | द्वितीया विभक्तिः |
| मात्रा | मातृभ्याम् | मातृभिः | तृतीया विभक्तिः |
| मात्रे | मातृभ्याम् | मातृभ्यः | चतुर्थी विभक्तिः |
| मातुः | मातृभ्याम् | मातृभ्यः | पञ्चमी विभक्तिः |
| मातुः | मात्रोः | मातॄणाम् | षष्ठी विभक्तिः |
| मातरि | मात्रोः | मातृषु | सप्तमी विभक्तिः |

एवं ननन्दृ, दुहितृ, यातृ इत्यादयः ।

## ४. मकारान्तः पुंलिङ्गः 'किम्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| कः | कौ | के | प्रथमा विभक्तिः |
| कम् | कौ | कान् | द्वितीया विभक्तिः |
| केन | काभ्याम् | कैः | तृतीया विभक्तिः |
| कस्मै | काभ्याम् | केभ्यः | चतुर्थी विभक्तिः |
| कस्मात् | काभ्याम् | केभ्यः | पञ्चमी विभक्तिः |
| कस्य | कयोः | केषाम् | षष्ठी विभक्तिः |
| कस्मिन् | कयोः | केषु | सप्तमी विभक्तिः |

SCERT TELANGANA

## ५. मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| का | के | काः | प्रथमा विभक्तिः |
| काम् | के | काः | द्वितीया विभक्तिः |
| कया | काभ्याम् | काभिः | तृतीया विभक्तिः |
| कस्यै | काभ्याम् | काभ्यः | चतुर्थी विभक्तिः |
| कस्याः | काभ्याम् | काभ्यः | पञ्चमी विभक्तिः |
| कस्याः | कयोः | कासाम् | षष्ठी विभक्तिः |
| कस्याम् | कयोः | कासु | सप्तमी विभक्तिः |

## ६. मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| किम् | के | कानि | प्रथमा विभक्तिः |
| किम् | के | कानि | द्वितीया विभक्तिः |
| केन | काभ्याम् | कैः | तृतीया विभक्तिः |
| कस्मै | काभ्याम् | केभ्यः | चतुर्थी विभक्तिः |
| कस्मात् | काभ्याम् | केभ्यः | पञ्चमी विभक्तिः |
| कस्य | कयोः | केषाम् | षष्ठी विभक्तिः |
| कस्मिन् | कयोः | केषु | सप्तमी विभक्तिः |

SCERT TELANGANA

## ७. अकारान्तः पुंलिङ्गः 'सर्व' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सर्वः | सर्वौ | सर्वे | प्रथमा विभक्तिः |
| हे सर्व | हे सर्वौ | हे सर्वे | सम्बोधनप्रथमा विभक्तिः |
| सर्वम् | सर्वौ | सर्वान् | द्वितीया विभक्तिः |
| सर्वेण | सर्वाभ्याम् | सर्वैः | तृतीया विभक्तिः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः | चतुर्थी विभक्तिः |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः | पञ्चमी विभक्तिः |
| सर्वस्य | सर्वयोः | सर्वेषाम् | षष्ठी विभक्तिः |
| सर्वस्मिन् | सर्वयोः | सर्वेषु | सप्तमी विभक्तिः |

## ८. अकारान्तः स्त्रीलिङ्गः 'सर्व' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सर्वा | सर्वे | सर्वाः | प्रथमा विभक्तिः |
| हे सर्वे | हे सर्वे | हे सर्वाः | सम्बोधनप्रथमा विभक्तिः |
| सर्वाम् | सर्वे | सर्वाः | द्वितीया विभक्तिः |
| सर्वया | सर्वाभ्याम् | सर्वाभिः | तृतीया विभक्तिः |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः | चतुर्थी विभक्तिः |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः | पञ्चमी विभक्तिः |
| सर्वस्याः | सर्वयोः | सर्वासाम् | षष्ठी विभक्तिः |
| सर्वस्याम् | सर्वयोः | सर्वासु | सप्तमी विभक्तिः |

SCERT TELANGANA

## ९. अकारान्तः नपुंसकलिङ्गः 'सर्व' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
| --- | --- | --- | --- |
| सर्वम् | सर्वे | सर्वाणि | प्रथमा विभक्तिः |
| हे सर्व | हे सर्वे | हे सर्वाणि | सम्बोधनप्रथमा विभक्तिः |
| सर्वम् | सर्वे | सर्वाणि | द्वितीया विभक्तिः |
| सर्वेण | सर्वाभ्याम् | सर्वैः | तृतीया विभक्तिः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः | चतुर्थी विभक्तिः |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः | पञ्चमी विभक्तिः |
| सर्वस्य | सर्वयोः | सर्वेषाम् | षष्ठी विभक्तिः |
| सर्वस्मिन् | सर्वयोः | सर्वेषु | सप्तमी विभक्तिः |

SCERT TELANGANA

# धातुरूपाणि

## परस्मैपदिधातवः

### १. डुकृञ्-करणे

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| करोति | कुरुतः | कुर्वन्ति |
| करोषि | कुरुथः | कुरुथ |
| करोमि | कुर्वः | कुर्मः |

#### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| करिष्यति | करिष्यतः | करिष्यन्ति |
| करिष्यसि | करिष्यथः | करिष्यथ |
| करिष्यामि | करिष्यावः | करिष्यामः |

#### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अकरोत् | अकुरुताम् | अकुर्वन् |
| अकरोः | अकुरुतम् | अकुरुत |
| अकरवम् | अकरवाव | अकरवाम |

#### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| करोतु / कुरुतात् | कुरुताम् | कुर्वन्तु |
| कुरु / कुरुतात् | कुरुतम् | कुरुत |
| करवाणि | करवाव | करवाम |

### २. वस - निवासे

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| वसति | वसतः | वसन्ति | प्रथमपुरुषः |
| वससि | वसथः | वसथ | मध्यमपुरुषः |
| वसामि | वसावः | वसामः | उत्तमपुरुषः |

#### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| वत्स्यति | वत्स्यतः | वत्स्यन्ति | प्रथमपुरुषः |
| वत्स्यसि | वत्स्यथः | वत्स्यथ | मध्यमपुरुषः |
| वत्स्यामि | वत्स्यावः | वत्स्यामः | उत्तमपुरुषः |

#### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| अवसत् | अवसताम् | अवसन् | प्रथमपुरुषः |
| अवसः | अवसतम् | अवसत | मध्यमपुरुषः |
| अवसम् | अवसाव | अवसाम | उत्तमपुरुषः |

#### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| वसतु / वसतात् | वसताम् | वसन्तु | प्रथमपुरुषः |
| वस / वसतात् | वसतम् | वसत | मध्यमपुरुषः |
| वसानि | वसाव | वसाम | उत्तमपुरुषः |

SCERT TELANGANA

## ३. णीञ् - प्रापणे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नयति | नयतः | नयन्ति |
| नयसि | नयथः | नयथ |
| नयामि | नयावः | नयामः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नेष्यति | नेष्यतः | नेष्यन्ति |
| नेष्यसि | नेष्यथः | नेष्यथ |
| नेष्यामि | नेष्यावः | नेष्यामः |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अनयत् | अनयताम् | अनयन् |
| अनयः | अनयतम् | अनयत |
| अनयम् | अनयाव | अनयाम |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नयतु / नयतात् | नयताम् | नयन्तु |
| नय / नयतात् | नयतम् | नयत |
| नयानि | नयाव | नयाम |

## ४. त्यज-विसर्गे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| त्यजति | त्यजतः | त्यजन्ति | प्रथमपुरुषः |
| त्यजसि | त्यजथः | त्यजथ | मध्यमपुरुषः |
| त्यजामि | त्यजावः | त्यजामः | उत्तमपुरुषः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| त्यक्ष्यति | त्यक्ष्यतः | त्यक्ष्यन्ति | प्रथमपुरुषः |
| त्यक्ष्यसि | त्यक्ष्यथः | त्यक्ष्यथ | मध्यमपुरुषः |
| त्यक्ष्यामि | त्यक्ष्यावः | त्यक्ष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| अत्यजत् | अत्यजताम् | अत्यजन् | प्रथमपुरुषः |
| अत्यजः | अत्यजतम् | अत्यजत | मध्यमपुरुषः |
| अत्यजम् | अत्यजाव | अत्यजाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| त्यजतु / त्यजतात् | त्यजताम् | त्यजन्तु | प्रथमपुरुषः |
| त्यज / त्यजतात् | त्यजतम् | त्यजत | मध्यमपुरुषः |
| त्यजानि | त्यजाव | त्यजाम | उत्तमपुरुषः |

SCERT TELANGANA

## ५. श्रु - श्रवणे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| श्रुणोति | श्रुणुतः | श्रुण्वन्ति | प्रथमपुरुषः |
| श्रुणोषि | श्रुणुथः | श्रुणुथ | मध्यमपुरुषः |
| श्रुणोमि | श्रुणुवः-श्रुण्वः | श्रुणुमः-श्रुण्मः | उत्तमपुरुषः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| श्रोष्यति | श्रोष्यतः | श्रोष्यन्ति | प्रथमपुरुषः |
| श्रोष्यसि | श्रोष्यथः | श्रोष्यथ | मध्यमपुरुषः |
| श्रोष्यामि | श्रोष्यावः | श्रोष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| अश्रुणोत् | अश्रुणुताम् | अश्रुण्वन् | प्रथमपुरुषः |
| अश्रुणोः | अश्रुणुतम् | अश्रुणुत | मध्यमपुरुषः |
| अश्रुणवम् | अश्रुणुव-अश्रृण्व | अश्रुणुम-अश्रुण्म | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| श्रुणोतु } श्रृणुतात् | श्रुणुताम् | श्रुण्वन्तु | प्रथमपुरुषः |
| श्रुणु } श्रृणुतात् | श्रुणुतम् | श्रुणुत | मध्यमपुरुषः |
| श्रुणवानि | श्रुणवाव | श्रुणवाम | उत्तमपुरुषः |

## ६. दाण्-दाने

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| यच्छति | यच्छतः | यच्छन्ति | प्रथमपुरुषः |
| यच्छसि | यच्छथः | यच्छथ | मध्यमपुरुषः |
| यच्छामि | यच्छावः | यच्छामः | उत्तमपुरुषः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| दास्यति | दास्यतः | दास्यन्ति | प्रथमपुरुषः |
| दास्यसि | दास्यथः | दास्यथ | मध्यमपुरुषः |
| दास्यामि | दास्यावः | दास्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| अयच्छत् | अयच्छताम् | अयच्छन् | प्रथमपुरुषः |
| अयच्छः | अयच्छतम् | अयच्छत | मध्यमपुरुषः |
| अयच्छम् | अयच्छाव | अयच्छाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| यच्छतु } यच्छतात् | यच्छताम् | यच्छन्तु | प्रथमपुरुषः |
| यच्छ } यच्छतात् | यच्छतम् | यच्छत | मध्यमपुरुषः |
| यच्छानि | यच्छाव | यच्छाम | उत्तमपुरुषः |

SCERT TELANGANA

## ७. स्मृ - चिन्तायाम्

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| स्मरति | स्मरतः | स्मरन्ति | प्रथमपुरुषः |
| स्मरसि | स्मरथः | स्मरथ | मध्यमपुरुषः |
| स्मरामि | स्मरावः | स्मरामः | उत्तमपुरुषः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| स्मरिष्यति | स्मरिष्यतः | स्मरिष्यन्ति | प्रथमपुरुषः |
| स्मरिष्यसि | स्मरिष्यथः | स्मरिष्यथ | मध्यमपुरुषः |
| स्मरिष्यामि | स्मरिष्यावः | स्मरिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| अस्मरत् | अस्मरताम् | अस्मरन् | प्रथमपुरुषः |
| अस्मरः | अस्मरतम् | अस्मरत | मध्यमपुरुषः |
| अस्मरम् | अस्मराव | अस्मराम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| स्मरतु / स्मरतात् | स्मरताम् | स्मरन्तु | प्रथमपुरुषः |
| स्मर / स्मरतात् | स्मरतम् | स्मरत | मध्यमपुरुषः |
| स्मराणि | स्मराव | स्मराम | उत्तमपुरुषः |

SCERT TELANGANA

# पदकोशः

| | | |
|---|---|---|
| **अ** | | |
| अकस्मात् | = | వెంటనే |
| अकृत्रिमम् | = | సహజమైన |
| अजरामराः | = | ముసలితనం, మరణం లేనివారు |
| अजानन् | = | తెలియనివాడై |
| अटवीम् | = | అడవిని |
| अतीव | = | మిక్కిలి |
| अधिगतान् | = | పొందబడిన |
| अधिरुह्य | = | ఎక్కి |
| अनर्थदायकम् | = | ప్రయోజనాన్ని కలిగించనిది |
| अनालोच्य | = | ఆలోచించకుండా |
| अनुभूतवान् | = | అనుభూతిని పొందాను |
| अन्तरङ्गम् | = | హృదయం |
| अन्यमनस्कः | = | ఇతర విషయాలపై మనస్సు కలిగినవాడై |
| अभ्यस्तवान् | = | అభ్యసించాడు |
| अमृतफलयुक्तः | = | అమృతఫలములతో కూడినది |
| अरुचिः | = | రుచిలేనిది |
| अवगन्तुम् | = | అర్థం చేసికొనుటకు |
| अविचार्य | = | విచారించకుండా |
| अशेषम् | = | సంపూర్తిగా |
| असहायौ | = | సహాయం లేనివారై |
| **आ** | | |
| आक्रम्य | = | ఆక్రమించి |
| आदिष्टवान् | = | ఆదేశించెను |
| आनीय | = | తెచ్చి |
| **उ** | | |
| उपवेष्टुम् | = | కూర్చొనుటకు |
| **क** | | |
| कर्णे | = | చెవియందు |
| कतिपयान् | = | కొన్నింటిని |
| कपोतः | = | పావురము |
| कम्पयन् | = | కదిలిస్తున్నవాడై |
| करौ | = | రెండుచేతులు |
| काकाय | = | కాకికొరకు |
| काननवृद्धिम् | = | అడవుల అభివృద్ధిని |
| कुर्वाणाः | = | చేస్తున్నవారై |
| कोटरे | = | తొఱ్ఱయందు |
| क्लेशान् | = | కష్టములను |
| **ग** | | |
| गर्दभः | = | గాడిద |
| गर्दभवर्य! | = | శ్రేష్ఠమైన గాడిదా! |
| गोसम्पत्तिम् | = | గోసంపదను |

SCERT TELANGANA

च

चतुरः = నేర్పరి

चालयन् = నడిపిస్తున్నవాడై

छ

छित्त्वा = తెంపి

ज

जायापती = భార్యాభర్తలిద్దరు

ज्ञातवान् = తెలుసుకొన్నాను/ తెలుసుకొన్నాడు

त

त्यक्तवान् = విడిచిపెట్టెను

द

दारुदलैः = కర్రముక్కలతో

दुर्दैवात् = దురదృష్టంవలన

न

नितराम् = మిక్కిలి

निद्रातः = నిద్రనుండి

निधाय = ఉంచి

निमील्य = మూసుకొని

नियुक्तवान् = నియమించెను

निर्जित्य = ఓడించి (తొలగించి)

निर्धनः = ధనహీనుడైన

निवेद्य = నివేదించి

नीत्वा = తీసుకొనివెళ్ళి

प

परस्मिन् = మరొకదాని యందు

पराजितान् = ఓడింపబడినవారిని

पराजितवान् = ఓడించాడు/ను

परिमार्ष्टुम् = తుడిచివేయుటకు

पक्ष्मणी = రెండు కనురెప్పలు

पिकः = కోకిల

पितामही = నానమ్మ

पुस्तकस्यूतः = పుస్తకాల సంచి

पूर्वापरौ = ముందు వెనకలను

पृष्ठतः = వెనుక వైపు

पौत्रः = మనుమడు (కుమారుని కుమారుడు)

पातयितुम् = పడవేయుటకు

ब

बह्वीः = చాలా

भ

भद्राणि = శుభములను

भविष्यन्तीषु = జరగబోయే వాటియందు

SCERT TELANGANA

| | | |
|---|---|---|
| भित्तिपत्रम् | = | గోడపత్రికను |
| भुजङ्गः | = | పాము |
| | म | |
| मत्वा | = | తలచి |
| मुक्तः | = | విడిచి పెట్టినవాడై/డు |
| मुग्धाः | = | ముగ్ధులైనవారు |
| | र | |
| रिपुः | = | శత్రువు |
| | ल | |
| लक्षितवान् | = | గుర్తించెను |
| | व | |
| वस्त्रापणे | = | బట్టల దుకాణమందు |
| | श | |
| शकटम् | = | బండెను |
| शकलम् | = | ముక్కను |
| शुकः | = | చిలుక |
| | स | |
| संयोज्य | = | కలిపి |
| सङ्केतम् | = | చిరునామాను |
| सद्यः | = | వెంటనే |
| सन्तः | = | సత్పురుషులు |
| सपदि | = | వెంటనే |
| सम्भाषणशीलः | = | మాట్లాడే స్వభావంగల |
| समीकरागारे | = | బాగుచేసే దుకాణమందు |
| सुप्रजाः | = | మంచి సంతానము |
| स्कन्धे | = | భుజమందు |
| स्वीकर्तुम् | = | స్వీకరించుటకు |
| | ह | |
| हन्तुम् | = | చంపుటకు |

SCERT TELANGANA

# क्रियापदकोशः

**अ**

अकरोत् = చేసెను
अवदत् = చెప్పెను
अवसताम् = నివసించుచుండిరి (ఇద్దరు)
अक्रीडत् = ఆడెను
अभवताम् = ఇద్దరు ఉండిరి
अस्तु = ఉండనిమ్ము

**आ**

आकर्षति = ఆకర్షించుచున్నాడు / చున్నది
आख्याति = చెప్పుచున్నాడు / చున్నది
आदिदेश = ఆదేశించెను

**इ**

इच्छन्ति = కోరుచున్నారు

**ख**

खादेत् = తినాలి

**ग**

गच्छतः = ఇద్దరు వెళ్ళుచున్నారు
गच्छेत् = వెళ్ళాలి
गायामि = పాడుచున్నాను

**ज**

जायन्ते = పుట్టుచున్నవి / కలుగుచున్నవి
जहाति = విడిచిపెట్టుచున్నాడు

**त**

तिष्ठतु = నిలువుము/నిలుచుగాక

**द**

द्रावयति = కరిగించుచున్నాడు / చున్నది
दर्शयामि = చూపించుచున్నాను
दास्यामि = ఇవ్వగలను

**न**

निगूहति = దాచుచున్నాడు / చున్నది
निवारयति = నివారించుచున్నాడు / చున్నది

**प**

प्रतिगृह्णाति = తిరిగితీసుకొనుచున్నాడు / చున్నది
प्रेरयिष्यामि = ప్రేరేపించగలను

**भ**

भुङ्क्ते = తినుచున్నాడు / చున్నది
भोजयते = తినిపించుచున్నాడు

**म**

मन्ये = తలచుచున్నాను

**य**

यतिष्ये = ప్రయత్నించగలను

**र**

रक्षत = రక్షించండి

**व**

वर्जयन्तु = వదిలిపెట్టండి
वितराम = పంచుదాము
विनिवेदयामि = నివేదించుచున్నాను
व्यसर्जयन् = విడిచిపెట్టిరి

**श**

शक्यते = తగి ఉన్నది
शक्ष्यामि = తగి ఉండగలను
श्रृणुयात् = వినవలెను

SCERT TELANGANA